द्रा० सूत्रदीपिका तृतीयचतुर्थोध्यायौ

५२३६

चतुर्थ्यां

शास्त्रदीपिकायां ~~द्वितीया~~न्ततीयाऽध्यायो पत्रे ११४

3



१

श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ अथातः शेषलक्षणं । एवं सिद्धे भेदे शेषशेषिवृत्तिरिदानीं चिंत्यते । भिन्नानां हि
तत्संभवति नाभिन्नानामिति भेदलक्षणस्य हेतुत्वं । यद्यपि व्रीहीनवहंति सोमेन यजेतेत्यादिषु द्रव्यकर्मणां शे
षशेषिभावेन कर्मभेदापेक्षा तथापि कर्मणामपि प्रयाजदर्शपादीनां शेषशेषित्वमिहैव वक्तव्यमिति तत्सिद्ध्यर्थं
भेदलक्षणापेक्षणं । ननु चावघातस्यापि व्रीहिभिर्यजेतेति शास्त्रांतरार्थेन शेषशेषि[illegible]त्वचिंता न व्रीहिपदा
र्थमात्रेण शास्त्रभेदलक्षणं च पूर्ववृत्तमिति भवति हेतुत्वं । तत्किं व्रीहीनवहंति व्रीहिभिर्यजेतेत्यनयोः शास्त्र
योर्भेदोस्ति । ओमिति चेत् । केन खलु । न तावन्निरपेक्षसाध्यभेदोत्रास्ति । नाप्यनुबंधभेदो येन शास्त्रभेदः स्या
त् । तस्माद्वाक्यांतरत्वमेवात्र न शास्त्रांतरत्वं । न च वाक्यभेदलक्षणं पूर्ववृत्तं । सोमेन यजेतारुणया क्रीणाती
त्यादिषु वाक्यांतरत्वमपि नास्ति दूरे एव शास्त्रभेदः । ननु तत्रापि ज्योतिष्टोमेन स्वर्गकामो यजेतेति शास्त्रांतर
विहिताधिकारसंबंधस्यैव यागस्य शेषः सोमनः । न सोमज्योतिष्टोमवाक्ययोरनुबंधसाध्यभेदोस्ति उभयत्रा
पि सोमयागस्यैव विषयत्वेनानुबंधभेदाभावात् निरपेक्षसाध्यभेदाभावाच्च । उद्भिदा यजेत पशुकामः सोयं च

राम
१

रुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादौ स्ववाक्य एव कलेयागस्य द्रव्यदेवतस्य च यागे शे[illegible]त्वमिति वाक्यांतरत्वमपि ना
स्ति। न येकस्मिन्नेव पदे प्रत्ययार्थश्चावमपूर्ववाप्रति प्रकृत्यर्थस्य यागस्य शेषत्वात् द्रव्यदेवो पि नास्ति। तन्तरां वा
वाक्यभेदेन न तमां च शास्त्रभेदः। तस्मात् कर्मणामंव शेषशेषिचचिंतार्थभेदलक्षणापेक्षणं। इतो पि न शास्त्र
भेदापेक्षा ताश्चावेप्यवघातान्ग्नेयादीनां शेषशेषित्वात्। तस्मात् कर्मभेदानुभाषणमेवोनत्। नानाकर्मल
क्षणं वृत्तमिति न तद्दारणशास्त्रभेदानुभाषणं। तस्येतानुपयोगात्॥ अत एव कर्मभेद एव पूर्वो ध्यायार्थो न
शास्त्रभेदः। सोत्रे एव चान्तः शब्देन पूर्ववृत्तस्य हेतुहेतुमुख्यते हेतुत्वं च कर्मभेदस्यैव संभवति न शास्त्रभेदस्येत्य
। अतः सूत्रभाष्यादिविपरीतं शास्त्रभेदस्याध्यायार्थत्वं। अयुक्तं च। अनुबंधांतरं हि बुध्यमानस्तदनुबद्धं नि
नियोगांतरमेव बुध्यते न मध्ये शास्त्रभेदं अतो नासौ चोदनार्थो। चोदनानार्थश्च न विचारमर्हतीति इति न त
द्विचारार्थं भेदलक्षणापेक्षणं इत्यास्तां तावत्। वक्ष्यमाणं चेदं शेषलक्षणं वत्यते कः शेष इति तल्लक्षणं के
न हेतुना शेष इति शेषशब्दप्रवृत्तिनिमित्तं कथं विनियुज्यत इति विनियोगप्रकारः श्रुत्यादीनि च विनियोगे

२

शेषस्य शेषिणा सहान्वयबोधने कारणानि प्रमाणानि तेषां च विरोधे बलाबलं तद्विरोधश्च कास्ति तदेतत्सर्वमभिसं
धाय शेषलक्षणं वक्ष्यामइति सूत्रितं। तदनेन सूत्रेण श्रोतृबुद्धिसमाधित्सया वक्ष्यमाणार्थप्रदर्शनमात्रं कृतं
नात्र पूर्वपक्षेण प्रयोजनं।१। शेषः परार्थत्वात्। उक्तं शेषलक्षणं वक्ष्यतइति तदिदमुच्यते। प्रथमं तावदनेन
सूत्रेण शेषस्वरूपं हेतुश्चेत्युभयमुच्यते। तत्र सूत्रे श्रुता हेतुरुच्यते परार्थत्वाच्छेष इति स्वरूपं त्व
र्थात् प्रदर्शितं पारार्थ्यं शेषशब्दप्रवृत्तौ हेतुस्तदा परार्थ एव शेष इति नाभावादिलक्षणाभासनिराकरण
पपारार्थ्यं लक्षणमुच्यते। केचित्किल येन विना यन्न भवति बीजादिनेवांकुरादिस्स बीजादिस्तस्यांकुरादेः
शेष इत्याहुः तदयुक्तं। रूपरसादीनामाग्नेयादीनां च मिथो विनाभावेन शेषत्वापत्तेः प्रयोज्यत्वं शेषत्वमि
त्यन्ये तदपि पुरोडाशकपालादिषु अप्रयोज्येष्वपि शेषत्वसंभवादव्यापकं। अन्ये त्वयं यस्मादधिकं वि
धीयते स तस्य शेष इत्याहुः। तदतिमंदं। अंगप्रधानानां परस्पराधिकात्। अन्ये तु विध्यंतविहितत्वं शेष
त्वमाहुः तदपि विध्यादिविहितानामपि त्रणरवाच्छेदादीनामंगत्वदर्शनादयुक्तं। तस्मादुपकारकत्वमेव शे

राम
२

षत्वमित्यन्ये। तदप्ययुक्तं। प्रधानान्यप्यंगानामदृष्टा नोपयोगं कुर्वंति शेषत्वं गच्छेयुः। तस्मात्पारार्थ्यमेवैकं
युज्यते शेषत्वलक्षणं। परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयते।२। कथं तर्हि श्रुत्यादिलक्षणं शेषत्वे न हि सो
मेन यजेतेति तत्रोपपापरोद्देशप्रवृत्तत्वं सोमस्योच्यते करणमात्राभिधानात्। उच्यते। न श्रुत्यादयः पा
रार्थ्यमभिदधतीति ब्रूमः। किंतर्हि विधिसहिताः पारार्थ्यं बोधयंतीति। विधिरपि नाभिधानेन पारार्थ्यं गमय
ति। किंत्वर्थापत्त्या। स हि चेतनप्रवर्तनात्मा न चानुद्दिष्टफले व्यापारे चेतनः प्रवर्तयितुं शक्यते इत्यर्थाद्वि
विषयस्य व्यापारस्य फलोद्देशप्रवृत्तता गम्यते फलार्थश्च व्यापारः फलवदेव पुरुषस्याभिलषित इति त
त्साधनत्वेन श्रुत्यादिभिरवगतानां तत्साधनत्वेन च विधीयमानानां सोमादीनामपि तदुद्देशप्रवृत्तिः सि
द्धा भवति। तस्माद्युक्तं श्रुत्यादिगम्यं पारार्थ्यलक्षणं शेषत्वमिति।२। द्रव्यगुणसंस्कारेषु बादरिः।३। अत्र शेषत्वस्य वि
षयकथनेन कः शेष इत्ययमेवांशः प्रपंचमेवांशः प्रपंच्यते। बादरिर्द्रव्यसंस्कारगुणेष्वेवाह शेषतां। श्रुत्यादेर्द
र्शनाच्चैते कर्मणामुपकारकाः।१। उपकारकत्वमेव शेषत्वं न पारार्थ्यं तस्यावोधकाभावात्। विधिस्तावन्मकर्त्तेना

मात्ररूपेणनतादर्थ्यंगमयति· क्रत्वादयोपि साध्यसाधनभावमात्रेण न तादर्थ्यं प्रतिपादयंति· तस्मादुपकारक

रकत्वमेव शेषत्वं· तच्च द्रव्यार्थानां द्रव्यगुणकर्मणां दर्शनादेवावगम्यते प्रो[illegible]क्षणादीनां तु क्रत्वादिभिः द्वितीया

द्विश्रीहीणां प्रोक्षणं प्रति साध्यत्वमभिदधानोपकारमंतरेण तदनुपपत्तेरुपकारं गमयति· ननु यागस्य फल

शेषत्वे फलस्य वा पुरुषशेषत्वे प्रत्यक्षं दर्शनं क्रत्वादयो वा संभवंति यजेतेति यागः कर्तव्य इत्येतावदुच्यते

न तु यागेन फलमिति· तदेतत्स्वर्गकामोधिकरणपूर्वपक्षे वक्ष्यामः। स्वर्गोपि काम्यमानात्मना शब्देनोच्यते

न त्वात्मार्थः परार्थो वेति· तस्मान्न तयोः शेषत्वं· अत एव न पुरुषस्य शेषितशेषत्वं तु तस्य द्रव्यत्वादिसमे

व। तस्मात् द्रव्यगुणसंस्कारेष्वेव शेषत्वमिति। तदेतत्स्वर्गकामाधिकरणपूर्वपक्षवादिनो वादरेर्मतं जैमि

निस्तु उपकारलक्षणस्य शेषत्वस्योक्तदोषत्वात् पारार्थ्यमेव शेषत्वं तच्च विधिगम्यमिति स्वर्गकामाधिकर

णसिद्धांते वक्ष्यमाणमभिप्रेत्य कर्मणामपि पारार्थ्योल्लेषयत्वमाह। तदेतत्तत्रसिद्धमिति नात्र किंचित्प्र

तिपाद्यं· प्रपंचमात्रं त्विदं पूर्वोक्तशेषत्वविषयस्य क्रियते· प्रपंचं तु कुर्वन्यारमतो पन्यासपरः सरं स्वमतमु

रम

३

पन्यस्तवान्। एवं फलस्यापि पुरुषविशेषगतत्वं कामवच्छास्त्रादेवावगम्यते विधिवच्छास्त्राच्च। न तस्य स्वार्थं कश्चित्कामयते। प
दपि परार्थं कामयते नदपि परे परस्य स्वार्थमेव। अत्र तु परं परप्रमाणाभावादात्मार्थं कश्चित्कामयतेवग।
म्यते विधिश्चानात्मार्थफलसाधने प्रवर्त्तयितुमशक्नुवन्फलस्यात्मार्थतां गमयति। यजेतेति चात्मनेपदनि
र्देशात्। तस्माद्यागफलयोरप्यस्ति विशेषता। न तत्र पुरुषस्यापि विशेषित्वं। न चैवं सर्वे नः प्रधानत्वात्पुरुषस्य विशेष
त्वं नास्तीति मंतव्यं। आख्यातेन कर्तुर्गुणभूतत्वेनोपादानात्। औदुंबरीसंमानादिषु तत्कृत्येव गुणत्वात्।
श्रुतेः सामर्थ्येन संबंधः। कः शेषः केन हेतुना शेष इति द्वयमप्युक्तमिदानीं कथं विनियुज्यत इत्ययमंशो निरूप्य
ते। दर्शपूर्णमासयोर्निर्वपणप्रोक्षणावघातादय ओषधधर्मा उत्पवनादय आज्यधर्माः शाखाहरणादयः
सान्नाय्यधर्माः श्रुतास्तेषु संशयः किं सर्वे ओषधे आज्ये सान्नाय्ये च कर्त्तव्या उत यथासंभोगं व्यवस्थेति। तद
र्थं च किं परमापूर्वप्रयुक्ता एते किं वा अवांतरापूर्वप्रयुक्ता इति। तत्सिध्यर्थमपि किमवांतरापूर्वाणि संति न वेति।
सत्स्वपि चैतेषु किं तानि प्रयोजकानि किं वा परमापूर्वं। परत्वापि तानि तदापि किं सर्वाणि सर्वेषां किं वा व्यवस्थेति।

४

५

किं प्रामं। एकमेव फलमपूर्वं फलस्यैवस्य सिद्धये। कल्प्यं नान्यानि धर्माणां तादर्थ्यात्संकरो भवेत्॥ २॥ अवघातादीनां
व्रीह्यादीनां संबंधोऽपूर्वसाधस्यैकस्य सिद्धये। कल्प्यं नान्यानि धर्माणां तादर्थ्यात्संकरो न विशेषत्वकृतो न व्रीह्या
दिस्वरूपकृतः तच्चापूर्वं सर्वेषामाग्नेयादीनामेकफलसाधनत्वादेकमेव कल्प्यते न बहूनि तदर्थमवघातस्त
दीपे हविषि कर्त्तव्यस्तदीनामेकफलसाधनत्वादेकमेव कल्प्यते न विशिष्टं अतो यथा व्रीहिषु कृतोऽवघातो
यवेष्वपि भवत्येवमाज्यादिष्वपि भवितुमर्हतीति। संतु वावांतरापूर्वाणि तथापि तानि निष्फलत्वाद्यागस्वरूप
वदेव न धर्माणां प्रयोजकानि परमापूर्वं तु फलवत्तत्तदेव प्रयोजकं। न चात्र वाङ्गि·यमन्यायः तत्र हि दी
क्षणीयाशब्दो दीक्षणीयापूर्वं लक्षणयोपस्थापयति ज्योतिष्टोमापूर्वं तु लक्षितलक्षणयेत्यस्ति विप्रकर्षः
अत्र तु परमापूर्वमवांतरापूर्वं च द्वयमप्याग्नेयादिसाध्यमिति न लक्षणायां विशेषः प्रधानत्वाच्च परमापू
र्वमेव प्रयोजकं युक्तं। यद्यपि चावांतरापूर्वाण्येव प्रयोजकानि तथापि प्रकरणाविशेषात्सर्वाणि सर्वेषां प्रयो
जकानि। तस्मात्संकर इति। अत्राभिधीयते संति तावदवांतरापूर्वाणि। कुतः॥ न ह्याग्नेयादिकर्माणि विश्रा

राम
४

राद्भूतैनैर्विना संहत्य परमापूर्वं जनयंति स्वरूपतः ॥१॥ तदेतदपूर्वाधिकरण एवानागतावेक्षणन्यायेन
प्रतिपादितं। सत्सु च तेषु तादर्थ्यमेवावघातादेर्युक्तं प्रत्यासत्तेः। यद्यपि चाग्नेयादीन्येवोभयत्र कारणं। त
थापि साक्षादुत्पत्त्यपूर्वे कारणत्वं न द्वारेण तु परमापूर्वे संबंधनिमित्तावलक्षणं। तेन व्रीहिद्रव्ये यागद्वा
रेणापूर्वमुपस्थापयन् प्रथमं तावत्तदपूर्वं निपततीति तस्यापि चावहननस्यैवानाज्ञातप्रकारत्वात्परमापूर्वसि
ध्द्युपयिकत्वेन न फलवत्त्वादतिक्रमकारणाभावात्तादर्थ्यमेवावघातादेर्युक्तं। सत्यपि च सर्वेषां प्रकरणा
विशेषे श्रुतेर्बलीयस्त्वावगदसंकरः। एवं चावघातादेर्ता दृष्टार्थता भवति। अन्यथा तद्दृष्टार्थता स्यात्। नु च
क्वचिदपि दृष्टसंभवे तत एवविधकल्पपत्तेरर्थापत्तिपरिक्षयाददृष्टकल्पनया सर्वार्थत्वं युक्तं। अतश्च यद्य
तावद्वहंतीत्येतावन्मात्रं श्रूयेत· तथापि दृष्टार्थत्वादेव व्यवस्था स्यात्किमुत यदा व्रीहीनादि संयोगेनैवश्रु
वणं तस्माद्यथासंयोगं व्यवस्था। ४। द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत। दर्शपूर्णमासयोस्सर्वाश्च कपा
लानि चेत्यादि श्रुतक्रमेतानि वैदरूपयज्ञायुधानीति स्फुटं तथास्येनो इडं तीत्यादीन्यपरिणवचनानि· तत्र संशयः

स्यश्च कपालानि चेत्याद्युपक्रम्यैतानि वै दशयज्ञायुधानीति श्रुतं तु यास्येनोद्धंतीत्यादीन्यपरिणवचनानि · न

५ 5 त्र संशयः किं स्फ्यादीनां येन पदार्थस्मिन्प्रकरणे शाक्यं तत्सर्वं तत्तद्वैर्तैर्न कर्त्तव्यमुत यथासंयोगमुद्धननादावेवेति·

तत्रायुधशब्दस्य साधनवचनत्वाद्यज्ञसाधनत्वं चैवं गम्यमानं साक्षादसंभवदंगेष्ववतरदविशेषात्सर्वा

गेषु विज्ञायते उद्धननादिसंयोगस्त्वनेनैव प्राप्तत्वादवयुत्यानुवादः। नैतद्युक्तं। एवं हि बहूनामुद्धननादि

वाक्यानामानर्थक्यं स्यात् · न चानुवादत्वमपि संभवति। नित्यप्राप्त्यभावात् · न स्फ्यस्योद्धननं स्फ्येनैव प्राप्तं अ

अनन्येनापि संभवात् · पाक्षिकानुवादत्वे वा नित्यवच्छ्रवणविरोधः। तस्मादेतानि वाक्यानि विधायकानि।

यज्ञायुधवाक्यं त्वेतैरेव प्राप्तार्थत्वाद्दशशब्दोपबंधादारब्धानां त्वाद्वाप्यनुवादकं। वरं च बह्वानर्थक्यादेकान

र्थक्यं न चास्यानर्थक्यं। यज्ञायुधानि संभरतीत्यनंतरस्मृतत्वात्सादनविधिशेषत्वात्। तस्मादस्मादस्यानु

वादत्वादितरे विधयो मताः। तेन स्फ्यादेर्व्यवस्थास्मात्कार्ये सूद्धननादिषु॥५॥ अथैकश्चेद्द्व्यगुणपारैककर्म्या राम

न्नियमः स्यात्। ज्योतिष्टोमे श्रूयते अरुणयापिंगाक्ष्यैकहायन्या सोमं क्रीणातीति। तत्रारुणाशब्दोऽयमाह ५

त्यधिकरणन्यायेनान्वयव्यतिरेकाभ्यां गुणवचनः पिंगाक्ष्यैकहायनीशब्दो यौगिको सामान्याधिकरण्यादेकद्र
व्यवाचिनो गुणाधिकारफलं च शब्दद्वयं। न चैकेन विहितेपरेण विधिनेसंभवतीति वक्तव्यं उभयोरपि श्रूयत एव द्रव्या
वाचकयोर्युगपत्प्रवृत्तेः। तदिहारुण्यामानं प्रति संदेहः। किमनेन वाक्यान्विताप्रकरणेन सर्वद्रव्येषु निवेत्रापामः
किं वा क्रीणातिना संबध्यत इदं गं सदेकहायन्यां निविशत इति। न द्रव्यं क्रियासाधनत्वं संभवतीति नेति। तत्र अ
मूर्त्तत्वाद्गुणो नैव क्रियां साधयितुं क्षमः। तस्मात् क्रीणातिना नास्य संभवत्येकवाक्यता। २। क्रीणातिना च
संबध्यमानस्तृतीयांसयोगात्करणकारकं स्यान्न चामूर्त्तस्य करणकारकत्वं संभवतीति नास्य क्रयसंबंध
इति ततः पृथग्भूतप्रकरणेन निविशत इति। ननु प्रकरणे वा कथमस्य निवेशः। न तावत्क्रियाभिरमूर्त्तत्वात्।
न च द्रव्यैः कारकस्य द्रव्यसंबंधानुपपत्तेः अनुपात्तानि चान्यद्रव्याणि कथं तैर्गुणः संबध्येत। स्यादेतन्न तृती
यया करणत्वाणि प्राकरणिकान्यनूद्य प्रातिपदिकार्थो गुणस्तस्य परिच्छेदकत्वेन विधीयते न तु गुणस्य कार
कत्वं येन द्रव्यसंबंधो न स्यात्। तृतीयया चोपादानात् द्रव्याणां नानुपादानं दोष इति। नैतद्युक्तं। न हि तृतीया

६

6

करणीभूतद्रव्याभिधायिनी विभक्त्योर्हि कारकत्वात् किं निरूप्याभिधायतया क्रियां विशिंषंति मत्वर्थकदंतकरणास्त्रि

द्वंद्वकारको पणर्जेनं द्रव्यं अभिदधाति येन गुणास्तत्परिछेदकतया संबध्येत· उच्यते· प्रातिपदिकमेव गुणवचन

मपि लक्षणया द्रव्यं प्रति तच्च तृतीयासंयोगात्करणं· तदनेन पदेन गुणविशिष्टं द्रव्यं करणभूतं प्रतिपाद्यते

तेनात्र विशेष्याणि करणद्रव्याणि प्रकरणगतान्यनूद्य विशेषणभूतो गुणः परिछेदकत्वेन विधीयते· येन

द्रव्येण किं विक्रियते तेनारुणागुणकेनेति। नन्वेवं लक्षितस्य द्रव्यस्य क्रयकरणत्वसंभवात् किमिति वाक्य

भेदः· नानेन लक्षितं द्रव्यांतरं शक्यं विधातुं· श्रौतैकहायन्यवरुद्धत्वात् क्रयस्य। एकहायनीलक्षणाद्धि विहिता

नूपनर्लक्षणया विधातुं शक्यते· अथैकहायनीमेवानूद्य तत्रैव गुणो विधीयतां न च विष्यति वाक्यभेदः· नैव

शक्यं विधीयते यत्रैकहायनी क्रयं प्रति गुणभूता च स्वार्थोच्चना सा वैकस्मिन्नेवोच्चारणेनुवदितुं गुणं

प्रति प्रधानीभवितुं पणयं चोच्चारयितुं शक्यते· आवृत्तिप्रसंगात्· प्राकरणिकानि तद्रव्याणि वाक्यांतरवि

हितानि शक्यं तेवाक्यांतरेनुवदितुं। तस्मात्प्रकरणेह्यानिमानि विशेषणद्रलिप्राप्ते ब्रूमः। तृतीयया गुण

राम

६

स्यैव करणत्वं क्रयं प्रति। विस्पष्टं गम्यते तच्च द्रव्यद्वारेणोपयुज्यते।२। पद्यमूर्त्तत्वादयं न साक्षात्क्रियां साधयि
तुमलं तथापि द्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं। न तत्परिच्छिन्नं द्रव्यं क्रियां साधयति। गुणश्च तत्परिच्छि
न्नमिति पुंस्कमस्य क्रियासाधनत्वं गुणं हि साधनत्वेन विदधच्छब्दो यथानेन शक्यते साधयितुं तथा तु यो
दित्याह। सर्वद्रव्यपरिच्छेदमुखेन शक्नोति साधयितुं नान्यथा। तेनायमर्थो भवति अरुणापरिच्छिन्नेन द्र
व्येण कुर्यादिति। एवं संभवति श्रोतस्यैव गुणस्य क्रयैकवाक्यान्वेषणे लवाक्यभेदश्च न युज्यते। यदा वक्रया
र्थत्वं तदीपद्रव्ये निवेशं देकहायन्यामेवास्य निवेशः। ननु वासः प्रभृतीन्यन्यान्यपि क्रयद्रव्याणि तेष्वपि
निविशेत। न तेषां क्रयोत्तरद्रव्यत्वात् भिन्नास्तेते प्रतिवाभं क्रयाः विधिभेदात्। सर्वे ह्येते विधयोऽन्योन्यस्मि
न्नुत्पन्ने विशिष्टद्रव्यावरोधात् द्रव्यान्तरं विधातुमशक्नुवन्तस्तत्तद्द्रव्यविशिष्टक्रयविधानार्थाः। न च विहितस
ति विधानं सम्भवतीति इहः क्रयभेदः। यदाह भाष्यकारः भिन्ने हि वाक्ये एकहायनीसाधनक एकः क्रयो वरुद्धोऽथ व
ति अरुणासाधनकमपि क्रयान्तरमिति। एवं हि वदन्वाक्यभेदे क्रयभेदं दर्शयति। तेनयेगुणकर्मता क्रयाणां श्र

दंनेछंतिनेमन्यायविरोधात्त्वोपेक्षणीयाः नचगुणकर्मणांभेदेनास्तीतिराजाज्ञाः ऐंद्रवायवाग्निग्रहाणांभेदस्यप्रस्तु

७ सोमाधिकरणेदर्शितत्वात्।अतोऽस्तिक्रयभेदः क्रयणेषुतुविकल्पःस्यादित्यत्राधिकरणेक्रयाणामेवविकल्पस

मुच्चयचिंतानद्रव्याणामित्यविरोधः॥२॥ एकत्वयुक्तमेकस्यश्रुतिसंयोगात्।एवंत्रिभिरधिकरणैःक्रमेणसंस्का

रद्रव्यगुणानांयथासंयोगंव्यवस्थोक्तासंयोगएवलिहानींचिंत्यते·किंविवक्षितविशेषणेनशेषित्वाशेषस्यसंयो

गःकिमविवक्षितविशेषणेनेति।एवंहिश्रुतंग्रहंसंमार्ष्टीति·तत्रसंशयः।किमेकस्यग्रहस्यसंमार्गउतस

र्वेषामितिःतदर्थंचकिमुद्देश्यगतासंख्याविवक्षितानवेति।तत्रश्रुतिबलाद्ग्रहसंख्योपादेयगामिनो।विवक्षि

तानथोद्देश्यगताश्रुत्यविशेषतः॥२॥ इतिप्राप्तेब्रूमः॥ उद्देश्यलक्षणंजातिर्यत्तुद्रव्यंलक्ष्यतेतया·तस्यांग्रहे

षसंमार्गःसर्वस्येतिविनिश्चयः॥३॥ यदिग्रहत्वजातेरयंसंस्कारःस्यात्ततस्यास्तःप्रतियक्तिसमाप्तेर्यत्रक्क

चित्द्रव्येसंस्कृतेसंस्कृतेवेतिनद्रव्यांतरेसंस्कारःक्रियेतःतस्यास्त्वमूर्त्तत्वादसाधनत्वाच्चतल्लक्षितानांद्रव्या एम

णांज्योतिष्टोमापूर्वसाधनानामयंसंमार्गःतत्रापियद्द्रव्याणिसंमार्गंप्रतिगुणश्रुतानिस्फः।प्रस्तुतिवयागंप्रति ७

ततोऽन्येन केनापि सिद्धेर्नो नन्वयं सर्वत्र क्रियेत न नियावद्गुणं प्रधानमावर्त्तयितव्यं प्रयोजनाभावात् ततश्च कि
यताद्रव्येणायं संमार्गः कर्त्तव्य इत्यपेक्षा भवति तस्यामपेक्षायां परिच्छेदकत्वेन संख्या विधीयेत पश्चैकत्वव
त्प्रधानानि त्विह द्रव्याणि संमार्गं प्रति द्वितीयानिर्देशात् प्रयोजनवलाच्च प्रति प्रधानं च गुणावृत्तेः समुच्चि
तानामयं संस्कार इति निश्चयात् अयं परिच्छेदकापेक्षा तदभावाच्च न संख्या पूर्ववदादर्त्तव्या। परिच्छेदकतया हि त
स्याः क्रियान्वयः न च परिच्छेदः परिच्छिन्ने संभवति तद्गुणभावान्न क्रियान्वयः संख्याया विधिरस्तु इत्युक्ते। विधीय
मानस्यैकत्वं सर्वद्रव्येषु समुच्चयेन संमार्गप्राप्ते परिसंख्यार्थं स्यात् तत्र च त्रिदोषा। न चैकस्मिंश्चमसे संमार्गविधिः प
रिसंख्या च संभवति वचनव्यक्तिभेदात् न चास्य विधिरपि संभवति कुतः। ग्रहस्य संमृज्जैवैतत्प्रधानं गुण एव
वा सर्वथा वाक्यभेदः स्यात् अतो नास्य विधेयता। ॥ विधीयमानं त्वेकत्वं यदि तावत् द्रव्यस्य विधीयते ततो ग्रहसं
मार्गसंबन्धो ग्रहैकत्वसंबन्धो ग्रहैकत्वसंबन्धश्चेत्यर्थद्वयविधानाद्वाक्यभेदः विहितमपि चैकत्वं ग्रहस्वरूपमा
त्रोपलक्षयत् न संमार्गविशेषणमिति सर्वेषां संमार्गः स्यादित्यपेक्षाविरोध एव। अथ संमार्गोन्वितस्य ग्रहस्यैकत्वसंबन्धो वि

८

8

यतेन स्वरूपस्यानेकत्वं स्यात् । नहि संमार्गोऽग्रहविशेषणं स्यात् । तर्हि विशेषणं भवति । संमार्गस्त्विहापूर्वो विधीयते कथमस्तो
ग्रहविशेषणं युगपद्द्वाविधानविशेषणत्वयोरस्य पृथक्प्रगमेवाक्यभेदः ग्रहं संमृज्यात् घं च संमृज्यात् स एकद्दति । अ
थैकत्वविशिष्टस्य ग्रहस्य संमार्ग एकोऽर्थो विधीयते न कश्चिन्पूर्वोक्तो दोषः स्यादिति मतं । कस्तदा भवति वाक्यार्थ
ः यत्तद्ग्रहजातीयमेकसंख्यं चद्रव्यं तस्य संमार्ग इति एकमपि सर्वेषां प्रत्येकमेकत्वात्तद्गहत्वाच्च संमार्गस्य चतद्गु
णत्वात्सर्वत्र प्राप्तिः स्यात् । अपि च विभक्त्या युगपत्संख्याकारकं चोच्यते न तु प्रथमं संख्या प्रातिपदिकार्थस्याभि
धाय पश्चात्तद्विशिष्टस्य कारकत्वं येनैकत्वविशिष्टस्य संमार्गं प्रति कर्मता स्यात् । तन्न तावदेकत्वं ग्रहविशेषणं
। अथैतदपि पश्चैकत्ववद्विभक्तिश्रुत्या कारकं सत्क्रिययैव संवध्यते तत्रापि द्वयोगतिः स्यादेकत्वस्यांगं संमार्गः
संमार्गोंगं चैकत्वं यदि तावदेकत्वांगं संमार्गः स्यात्ततो ग्रहमेकत्वं चोद्दिश्य संमार्गविधानाद्द्वेदयोश्चोपादे
यत्वक्रियया वक्रीकृता संभवात्प्रत्येकमेव ताभ्यां क्रियासंबंधान्प्रन्यद्दरयं वाक्यसमाप्तिर्वाक्यभेदः पुनरपि ग्र
हस्यैकत्वानपेक्षस्यैव संमार्गोन्वयान्सर्वग्रहसंमार्गः स्यादित्यसमत्पक्षसिद्धिः । अथैकत्वं संमार्गस्य गुणः तस्य

एम

८

नेतरत्फलं न हि हितो यागगुणत्वं वति प्राधान्यवाचिनो हि सा। अथ सकृच्छ्रवणस्य गुणत्वमुच्यते न श्रुतिसंभ
वे सा युक्ता: किंच तथा सति ग्रहस्यापि गुणत्वं स्यात्। अथैकत्वस्य गुणत्वं ग्रहस्य च प्राधान्यमुच्येत न तच्छक्यं कथं
हि सकृदुपात्ता द्वितीया विभक्तिर्ग्रहापेक्षया प्राधान्यं श्रुत्याभिदधात्येकत्वापेक्षया च गुणत्वं लक्षयेत्। न च क
थंचिदेकत्वं विवक्षयितुं शक्यं। ७। संख्याराहुग्रहाणामव्यवस्था स्यात्। किमेकत्ववत्प्रातिपदिकार्थस्याप्यविवक्षित
त्वाच्चमसानामपि संमार्गः कर्तव्यः उताविवक्षाकारणाभावाद्ग्रहाणामेवेति विचारः। तत्र संमार्ष्टीत्येतावत्फलके सो
मावसेकनिर्हरणप्रयोजनं तथा सोमपात्राणामित्यवगमाद्यः कस्येत्यपेक्षाभावादविवक्षितं ग्रहणमेकत्व
वदुपलक्षणमात्रं। अपि च सोमयागस्यैकत्वात्तदपूर्वमप्येकमेव तत्साधननिर्विशेषी च संमार्गः चमसेष्वपि तत्साध
नेषु भवितुमर्हति न त्वत्र कर्मभेदोऽस्ति येनापूर्वभेदाद्व्यवस्था स्यात्। तस्माच्चमसेष्वपि स्यादिति प्राप्ते
ऽभिधीयते। न हि ग्रहविवक्षायां वा कर्मभेदः प्रसज्यते। यागैकत्वेऽप्यपूर्वाणि भिद्यन्तेऽभ्यासभेदतः। ९। न तावदेकत्वविव
क्षावद्ग्रहविवक्षायां वा कर्मभेदः अवश्यं हि संमार्गः कस्यचिद्विधातव्यः तत्र श्रुत्योपनीतं ग्रहमुत्सृज्यान्यत्कथं

यत्सामर्थ्यलभ्यांसोमपात्रमात्रं गम्यते। स एकस्यापि च यागस्याभ्यासभेदात्तेषां चापूर्वमंतरेण संहत्यकारित्वायोगाद
१ वश्यं प्रत्यभ्यासमपूर्वाणि भिद्यंते। ततश्चाग्रहणाद्दलक्षितापूर्वविशेषनिबंधनः समागोन च मसेषु कर्तव्यः। ।। आ
नर्थक्यात्तदंगेषु सप्तदशारत्निर्वाजपेयस्य यूप इति श्रूयते। तत्र संशयः। किं सप्तदशारत्नित्वं वाजपेयसाधनोर्ध्वपा
9 त्रद्वारेण वाजपेयांगं उत यूपद्वारेण पश्वंगमिति। तत्र दर्शे च। किं सप्तदशारत्निर्वाजपेयस्येति व्यवनाक्तिरुतस सप्तद
शारत्निर्यूप इति। तत्राव्यवहितत्वात्प्रधानत्वात्प्रकरणानुग्रहाच्च सप्तदशारत्निर्वाजपेयस्येति संबंधः परिमाणं च साक्षा
त्कर्मणि न संभवतीति तत्साधनभूतोर्ध्वपात्रद्वारेण संबध्यते। यूपवदश्चोर्ध्वपात्रत्वसाधारणपादृत्ते। यद्वा वाज
पेयस्येति षष्ठ्यानन्तसंबंधपूर्ध्वपात्रमुद्दिश्य सप्तदशारत्नित्वं विहितं तद्द्वारेण वाजपेयांगं भवति। एवं च वाजपेये पञ्च
दः श्रुतिर्न्नो भवति यूपसंबंधे तु वाजपेयस्य यूपाभावात्पशुयागसंबंधित्वाद्यूपस्य वाजपेयस्य यूपाभावात्पञ्च
दः पशुलक्षणार्थः स्यात्। न नितरत्रापि यूपशब्दो गौणः स तु न दोषो जघन्यत्वाद्यूपवाक्यस्य वाजपेयशब्दस्य तु राम
मुख्यत्वात्तल्लक्षणायुक्ता। तस्मादूर्ध्वपात्रेनिवेशः स्यादेवं यदि यूपेन संबंधे लक्षणा भवेत्। वाजपेयश्रुतिर्नासो श्रुतिद्व १

त्तैव सायनः।१।४षष्ठीसंबंधमात्रार्थानांगामित्वमपेक्षते॥ नाप्यवधिसंबंधं देवदत्तस्येव भवतु।१। यूपस्य च पशु
द्वारा वाजपेयोपकारत्वः। संबंधमात्रमस्त्येव क्रतुनात्तो न लक्षणा।३। ऊर्ध्वपात्रेण संबंधे यूपशब्दस्य लक्षणा। अ
नंतरेण संबंधः प्रधानेन च संगतिः।४। प्रक्रियानुग्रहश्चैवं नादृत्यः श्रुतिबाधतः। तेन सप्तदशारत्निर्यूपइत्येव सं
गतिः।५। सा च प्रकरणाद्वाजपेयसंबंधियूपगा। तेनायं वाजपेयस्थस्येत्यनुवादो भविष्यति।६।२।१। कर्तृगणेन तु कर्मोऽस
मवायाद्वा भेदः स्यात्।। दर्शपूर्णमासयोः प्रयाजसमीपे श्रूयते अभिक्रामं जुहोतीति। तत्र भाष्यकारेण जुहोतेः
सन्निहितप्रयाजविषयत्वं सिद्धं कृत्वा किमभिक्रमणं तेनैकवाक्यं सन्न कर्त्रा संबध्यते किं वा ततो भिन्नं संस्कृत्य
प्रकरणेतिविचारितं। एवं च पूर्वः पक्षः। क्रियमाकारकस्यैकनान्यस्यास्त्येकवाक्यता। न चाभिक्रमणं मूर्तिवर्जितं का
रकं भवेत्।१। न चारुण्यवत् द्रव्यद्वारेण संभवति तत्र येकहयनीद्रव्यमुपात्तं पूर्वं यत् द्वारत्वं तां प्रतिपद्यते। अ
त्र तु जुहोतिना कर्तुरनुपादानात्र द्वारता। तस्माद्विच्छिन्नं प्रकरणेन गम्यते श्रुते चक्रियायाः प्रकरणेन ग्रहणं प्रयाजा
दिवत्।। संभवति हि कर्मणः कर्मोपकारकत्वं कारकत्वं तु न संभवति। तस्माद्दर्शपूर्णमासांगं सत्सामर्थ्यात्कर्तृसं

१०

10

स्यात्वं भवति कर्त्ता च सर्वं प्रयोगांगमिति सर्वप्रयोगसंबंधोभिरुक्रमणस्येति । सिद्धांतस्तु· अनुपात्तोपि सद्भावमा
त्रेण द्वारतां व्रजेत् । कर्त्ताभिक्रमणं तेन श्ववेद्धोमस्य साधनं ॥१॥ वार्त्तिककारस्त्वर्कतमभिक्रमणेन क्रिया
तोन्येन संबध्यते तस्मान्जुहोतिसंबंधस्यस्पष्टत्वात्तेन विच्छेदाशंका इत्यन्यथाधिकरणं वर्णयांचकार । अ
भिक्रामज्जुहोतीति होमाय्ठनुवादेन विधीयमानमभिक्रमणं किं प्राकरणिकसर्वहोमांगं उत प्रयाजहोमस्यै
वेति संशयः तदर्थं किमवांतरप्रकरणमस्ति न वेति । फलवद्भावनोप्युत कथंभावतिरोहितः ॥ नैवांगानां क
थंभावाः प्रादुःष्यंतीतमंतरा ॥१॥ प्रादुष्युर्यदि वांगानां कथंभावास्ततो मिथः । तेषामंगांगितापत्तेरव्यवस्थाप्र
सज्यते ॥२॥ तस्मान्नावांतरप्रकरणं तदभावे च सन्निधिमात्रेणाभिक्रमणं प्रयाजांगं स्यात्स च दुर्बलः प्र
करणात् अतो दर्शपूर्णमासभावनयासंबंधात्तदीयसकलहोमांगमभिक्रामाणं वर्हिर्धर्मवत् । न च स
त्यपि अवांतरप्रकरणे वाक्येनैव प्रयाजांगता स्यात् । अभिक्रामं जुहोतीति नैवं जुहोतेः साधारणत्वेन प्रया
जोपस्थानाभावात् नन्वनुवादोयं सन्निहितगामी प्रयाजाश्च सन्निहि जुहोतीति । नैवे तु बुद्धिविपरिवर्त्तिरनुवा

एम

१०

दस्यायेक्षितान पाठप्रत्यासत्तिः तथासत्यर्थं न सन्निहितोऽन्तमप्रयाजस्यैवाभिक्रमणमंगस्यात्तु न समिदादी

नां तथा वर्हिर्विहहविंष्यासादयति यस्यैव हविषः कियानपि पाठतः सन्निधिविशेषोऽस्ति तस्यैव बर्हिष्यासादनं

स्यात्तु नान्येषां। बुद्धिविपरिवृत्तिश्च सर्वहोमानामविशिष्टाप्रकृतत्वादिवातो बर्हिर्वत् विशब्दस्यैव जुहोतिश

ब्दस्यापि संकोचायोगात्सर्वहोमांगमभिक्रमणमिति। भवेदेवं प्रयाजानां नास्ति प्रकरणं यदिति षां वचनसं

युक्तायेगुणा विहिताः पुरा।१। पश्चाच्चये विधास्यन्ते नैनैः संदष्टमिदं श्रुतं अभिक्रामं जुहोतीति न ततोऽन्यत्र गच्छ

ति।१। प्रजोयान्विधाय समानयत उपभृत इत्यादिगुणान्विधायाभिक्रामं जुहोतीत्युक्तायेवै प्रयाजानां मिथु

नं वेद समिधो वसेखियजतीत्यादियावत्प्रयाजानिष्ट्वा हवींष्यभिघारयतीति प्रयाजपरामर्शादर्शनाल्लून

मेतावता प्रदेशेन प्रयाजाः समाप्यन्त इत्यवगमात्तन्मध्यपतितमभिक्रमपर्यन्त तद्गतिक्रमेणान्यत्र गच्छति

विघतेवांगभावनामप्यविज्ञातप्रकारता कथमित्याकांक्षा। तर्ह्यपि न विघते तु संदंशोयत्र वाचनिके गुले।। तत्रां

गानां कथंभावः सन्नप्यविनियोजकः।१। निष्फलत्वेन सर्वेषां न विशेषोवगम्यते कः शेषः स्यच्छेषित्वमतः सर्वं

११

19

प्रधानगं।२।अव्यवस्थाप्रसक्तिर्द्वयोक्तासैवंनिराकृता।संदंशेसतिसंदष्टंतदंगमिनरस्यत्पुनः।३।सर्वप्रधानगामीति
नाव्यवस्थाप्रसज्यते।यस्त्वाहसाधिकाराणामितिकर्तव्यताश्रिता।४।नान्येषामितिनस्यापिप्रतिज्ञातप्रकारत
उभयेषांहिसाभवेत्।५।नान्यापिस्यादनुष्ठेयापाति।नचेदनुष्ठानमेवनस्यात्।६।एतावांस्तुविशेषोपदेशामन्यार्थ
मनुष्ठानंसाधिकाराणांतुस्वनिष्ठमिति।७।नचैतावतातावताविशेषोन्यार्थस्याप्यविज्ञातप्रकारस्यानुष्ठानासंभ
वात्।प्रयाजेरपूर्वंकृत्वाप्रधानस्योकुर्यादित्युक्तेयोनामप्रयाजेरपूर्वंकर्तुंनजानातितस्यभवत्येवकथममीभि
रपूर्वंकर्तव्यमितिप्रकारविशेषादेशासत्यामपिनस्यांसंदंशपतितंपरांगंनस्यात्ततोऽविशेषात्सर्वंफलव
वदंगंस्यात्।प्रकाराकाङ्क्षातुवाचनिकेगुणेरर्थादितिलक्ष्येनचस्वरूपनिष्पादनेनाचमनादिभिश्चदर्वीहो
मवत्पूर्यते।अभिक्रमणंतुसंदंशयतितत्त्वादर्वांतरप्रकरणोद्गतेःप्रयाजांगं।एकदेशिनांतत्त्वांतरप्रकरण
भावात्सन्निधिबाधेनप्रकरणाविशेषात्सर्वार्थस्यादित्यास्तांतावत्।१०।संदिग्धेतुव्यवायाद्वाक्यभेदःस्यात्।२।द
र्शपूर्णमासयोःसामिधेनीर्विधायतासांचत्रिःप्रथमामन्वाहेत्यादिवचनैर्गुणान्विधायतान्तोभिविशेनाममं

राम

११

त्राद्देवे होमन्विद्ध इत्यादयो विहिताः ततः काम्याः सामिधेनीकल्या विहिताः तदनंतरं यज्ञोपवीतमाम्नातं उपव्य
यन्ते देवलक्ष्ममेवतत्कुरुते इति ततः पुनरपि च सामिधेनीनामेव वाचनिकागुणा विधास्यंते अंतरानूच्यं स
देवत्वायेत्यादयः तत्रोपवीतं प्रतिसंशयः सामिधेन्यंगमुत दर्शपूर्णमासांगमिति तदर्थं च किं सामिधेनीनां
वाचनिकगुणोन्मूलनमवांतरप्रकरणमुपवीतविधावनुवर्ततेथवा विच्छिन्नमिदं निविद्भिरिति। अनुवर्तते त
दंगत्वं विच्छिन्ने दर्शाद्यंगता किं प्राप्तमुभयत्रापि कीर्तनादनुवर्तते।१। पुरस्तादुपवीतस्य परस्ताच्चापि कीर्त
नं। विद्यते सामिधेनीनामतः प्रकरणास्तिता।१। निविद्दस्क्तपूषानुमंत्रणमंत्रवत्स्वरप्रकरणपठिता इत्य
वगंतव्यां अथवा। निविदामपि तादर्थ्ये तु कथं भावसंगतेः। नत्वांगैर्व्यवधीयंते प्रधानाकिनीयं च न।१। का
म्येष्वप्याश्रयत्वेन तासामप्यनुवर्तनं उपवीतमतस्तासामंगप्रकरणाद्भवेत्।१। एवं प्राप्ते वदामोत्र निवि
द्भिर्व्यवधानतः॥ विच्छिन्ना सामिधेनीनां प्रक्रिया नानुवर्तते।२। यस्क सन्निधान सेवासंबंधिभिः यदैर्व्यवधा
नं न प्रकरणस्येति मन्यते तस्य सर्वकर्मणां सर्वे प्रकरणानुवृत्तेः सर्वे धर्माः सर्वेषामुपदेशेनैव स्फुः अतो वि

ग्निहोत्रादीनामपिक्रत्वर्थत्वंस्यात् यत्तुनिविदामप्यवांतरप्रकारणेनसामिधेन्यंगत्वाद्व्यवधायकत्वमित्युक्तं तद्
युक्तंलिंगेनहिप्रकरणंबाधित्वानिविदोग्निसमिंधनांगंभवतिनचापिःसामिधेन्यंगंभवतियेनतद्द्वारेणनिवि
दोपिनद्दंगंस्यात्ःकिंतुसामिधेन्यएवाग्न्यंगंनिविदोपिःनतासांमिथःसंबंधःयथावक्ष्यतिगुणानांचपरार्थत्वाद
संबंधइति।अनेनासंबंधविधिभिर्निविदित्यवैदेर्शपूर्णमासांगैर्विच्छिन्नंसामिधेनीनामकरणंनोपवीतंगच्छति।नन्वं
वानिविदंगमुपवीतंस्यात्॥नतासांप्रकरणमस्तिअश्रुतेःकीर्तनाभावात्सन्निधिमात्रमपिनास्तिकाम्ये
र्व्यवधानात् नहिंकाम्यानामंगंस्यात् अव्यवधानात्फलाकीर्तिनामभावात्वच्छेदेनचप्रकरणसद्भावात्ःतु
।तेषांविकृतित्वात् रहाहिननित्यसामिधेन्याश्रयणेनगुणमात्रंफलायविधीयन्तेविच्छिन्नप्रक्रियाणांतासा
माश्रयत्वानुपपत्तेःवाक्येनचाश्रयसंबंधेवाक्यभेदात् किंत्वनुवचनैर्नैतानिसंख्याविशिष्टानिफलेविधीयंतेतेषा
मितुसंख्यायुक्तानुवचनत्वसामान्यान्नित्यानुवचनप्रकृतीवितत्वश्रुतासाम्नचामन्येषांचतद्धर्माणांप्राप्तिःअ
नुवादेनवपस्तत्रनमःप्रवक्तइतिनिगदानंतरभावःसामिधेन्यंगत्वेन्योक्तःसोप्यत्रोतिदिव्यन्तेसचनिगदःक

राम

तुप्रयुक्तत्वान्न बहिः प्रयोगे लभ्यते तेन गत्वकृद्भेदेनानुवचनांशानामपि क्रत्वनुमध्य प्रयोगसिद्धिः एतैरेव चाग्निस
मिंधनस्य प्रसंगात्सिद्धे नित्यानुवचननिवृत्तिः तेनैतेषां चैवं पूर्वाधिकरण पूर्वपक्षेपि विच्छिन्नमप्यभिक्रम
णमेकपदत्वात्सन्निहितेनैव प्रयाजकर्त्रानीयत इति तदधिकरणवैयर्थ्यं स्यात्. नन्वाभिक्राममित्यस्या
नाख्यातत्वात्सिद्धवत्प्रतीतेर्नैकर्त्रीकांक्षा किंतु शेषिभूतस्तत्र कर्त्रापेक्षितो न च शेषिणान्विताभिधान
मितिमेवं। अवघातादिषु शेषिणापि अन्विताभिधानाभ्युपगमात्। अपि च सर्वाण्येव कार्यार्थानि प
दानि कार्येण शेषिणान्वितमर्थमभिदधातीति यत्किंचिदेतत्। अपि च। यदि न शेषिणान्वितमर्थमभिधा
नं केन न सर्वान्वितमभिक्रमणमभिधातव्यं न त्वनन्वितस्याभिधानं संभवात्तेगुणभूतस्य कर्त्तानपेक्षितत्वा
न्नतेनान्विताभिधानं संभवतीति त्वयोक्तं संभवेवा सन्निहितेनैव प्रयाजकर्त्रान्विताभिधानाद्यर्थमेकवाक्य
त्वप्रतिपादनं प्रधानविधिनाभिक्रमणमन्वितमभिधीयत इति चेत्तन्न तस्यापि शेषित्वात्. उपवीतस्यापि
न संभवात् न सन्निहितेनापि सामिधेनीकर्त्रान्वियः स्यात् अथानभिहितमभिक्रमणं न्याह को गल्हीयात्तु

पवीनमपीग्रह्णीयात्। यद्यपि शेषिभूतः कर्त्रा देप्सितो नानुष्ठानाद्भूत्त इति तदपि विपरीतं अर्हितस्य शेषापेक्षाभा
वात्। कर्त्रपेक्षा तु क्रियास्वाभाव्यादेवस्याद्दित्यास्तां तावत्॥११॥ गुणानां च परार्थत्वादसंबंधः समत्वात्स्यात्। आ
धानप्रकरणे वारणवैकंकतानि यज्ञसंयुक्तानि पात्राणि श्रूयंते वारणो यज्ञावचरो वैकंकतो यज्ञावचर इति
पवमानेष्टयोप्याधानप्रकरण एव प्रदेशांतरे श्रुताः॥ तत्र पात्रे प्रधानान्यभ्यर्थानीति पत्संगं ततो यज्ञ
संबंधात्साक्षादाधाने असंभवंत्यपि पात्राण्यानर्थक्यतदंगन्यायेन पवमानेष्टिषु भवंति अनंगत्वे तु क
थंचिदपि यज्ञसंयुक्तानां प्रकृताधाननिवेशासंभवादिष्टीनां च स्वयमप्रकृतत्वादनारभ्यवादरूपेण सर्वयज्ञेषु सं
भवंति॥ तत्राधानस्य द्वितीयासंयुक्ताग्निसंस्कारार्थतया फलवत्त्वादफलानि पवमानहवींषि प्रकरणात्तदंगं
॥ अत्रोच्यते। यदाहवनीये जुहोतीति वाक्यादेषामभ्यर्थत्वा॥ नन्वनारभ्यवादोयं सर्वहोमांगनाहवनीयं विध
त्तेन त्वाहवनीयांगत्वं पवमानहविषां॥ अत्र कश्चिदाह। अनारभ्यवादेन प्रकृतावाहवनीयांगतेन विहि
तः॥ पवमानेष्टिषु अतिदेशेन प्राप्तः॥ सच पवमानहविर्वेलायामनिष्पन्नत्वान्नांगं संभवतीत्यंगत्वेन निवृत्तेय

12

राम
१३

स्तस्य प्रकृतौ दृष्टः साक्षात्संबंधोत्राः सइहं संभवेन बाधनीयः अवश्यं च पवमानहविषां आधानागत्ववादि
तापि अग्निनिष्पादकत्वमप्यफलं प्रणंतर्यंतत्वप्राकृतसाक्षात्संबंधावाधाय साक्षादेवास्तु किमाधान
प्रणाड्या समाश्रीयत इति सिद्धमग्न्यर्थत्वान्न दिदृसारं यत्नावजकसंभगचं निवृत्तमितित तत्त्वसिद्धांतप्र
स्मरणात्तन्न द्विचोदकावगतमंगत्वं निवर्तते। पृथक्पि चानिष्पन्नत्वान्न साधयति तथाप्यसाधयन्न एवांग
त्वमवघातस्येव कल्लवराववतिष्ठते तेन साक्षात्संबंधस्यांगत्वेनैव प्रकृतिवदुपपन्नत्वान्न तत्सिध्य
र्थं साध्यत्वमंगीकर्तव्यं। अपि चार्थिकः प्रकृतौ साक्षात्संबंधोंगत्वमेवत्र शास्त्रार्थः न चार्थिकं चोदकः प्रतिदिश
तियद्वलेन साध्यता स्यात्। प्रतिदिश्यते वा संबंधः स तु येन केनापि प्रकारेण सिध्यतीति साध्यत्वविशेषः कुतो
लभ्यते। यत्तु साध्यत्वमाधानांगत्ववादिनाप्युपेयमिति सत्यमुपेयमस्ति हि तस्य प्रकरणं प्रमाणं भवतस्तु
किं प्रमाणं प्रकरणमेवेति चेत् तथा सत्याधानांगत्वद्वारेणैवाग्नीनां साध्यत्वं स्यात् यदित्यविशेषितसाध्य
त्वं प्रकरणात्सिध्येन्न तोतिदेशवशेन साक्षात्त्वादित्याश्रीयेत क्रत्वर्थत्वमेव तु प्रकरणादवगम्यते नाविशिष्टं साध्य

१४

14

त्वंनेन प्रियादिप्रकरणमंगीक्रीयेताधानांगत्वेवस्यात् नचैत्साध्यत्वमेवनस्यात् विश्वजिदादिवत्तु फलंकल्प्यापि
ताग्नीनामंगत्वमेवस्यात् अतएवातिदेशावगतसाक्षात्संबंधवलेनैवसाध्यत्वं तन्तूपदेशात्मकप्रकरणा
वगतत्कलर्थत्वविरोधाद्वाधितव्यं अपिचक्रुपरत्वेपदीष्टीनांनभवति साक्षादिष्टिसाध्यत्वमग्नीनां तादृ
सकलप्राकृतीगार्हितोपकारसवित्वा अग्नीन्साधयन्ति तेनसर्वांगानुष्ठानावच्छिन्नमुत्पत्त्य पूर्वंद्वारभूतमं
गीकार्यंन त्वप्रणाड्याग्नीनांसाध्यत्वंनसाक्षात् अपिचनप्रकृताबाहवनीयस्यसाक्षात्संबंधः अंगभूतेनप्रक्षे
पेणाहवनीयस्यसंबंधोनसाक्षायामेनतदिहापिप्रकृतिवदतिदेशोत्प्रणाड्यैवसंबंधःस्यात् तस्मान्नैवमग्न्य
र्थतासिध्यतीत्यनुइत्तरं वाच्यं तूच्यते अयमभिप्रायेभाष्यकारस्य अनाभ्यविधानेनत्यनाग्न्यर्थताभवेत्
तत्तुल्यवाक्यमस्सन्न्यत्यवमानेष्टिसान्निध्ये। तेनचाग्नेरनिष्पन्नस्यैवसाधननित्वेनविधानासंभवात्तस्यैवनिष्पा
दयितव्यस्यफलवतः साधनत्वेनाकलानिपवमानहवींषिविधीयंते सप्तमीचलक्षणा साध्यत्वमेवप्रति
नत्तिपयपत्तिरद्धानमधीतिवत् तस्माद्वाक्येनाधानवत्पमानहविषामग्न्यर्थेवाना धानांगत्वं। अतःस

राम

१४

वैयज्ञार्थ्यान्निपात्राग्निः। आचार्यस्तु सत्यपि पवमानहविषामग्न्यर्थत्वे पात्राणां वाक्येन सर्वयज्ञार्थं नासिध्यती
तिवाक्यसहाय्यकल्पनोक्तं न मम। षेव्रीहीनवहंतीत्यादिषु यथाश्रुतव्रीहिमात्रार्थत्वेवघातस्यानर्थक्याघु
क्तः प्रकरणानुप्रवेशः तद्दशे न च व्रीहिशब्दस्य द्रव्यसाधनरूपलक्षणाश्रयणं इह तु यथाश्रुतयज्ञार्थ
त्वेपि दीक्षणीयार्थस्येव वाङ्नियमस्यानर्थक्याभावान्न लक्षणाश्रयणेन प्रकरणानुप्रवेशकल्पना न्याय्या
·यदि पवमानेष्टिसन्निधौ पात्राणि यज्ञार्थान्यभिधीयेरन् तत्तेनानुवादस्य सति संभवे सन्निहितत्वाभिलात्तद
ङ्गारलितमिव वाजपेयस्य प्रकृतिवच्छन्दःसन्निधापिते पूर्वेद्युः स्थलहोमवच्च सौर्यस्य प्रकृतिवच्छन्दःसन्निध
पिते सुप्रयाजेषु पवानेष्ट्यनुवादेन विधानात्रासेव पात्राणि स्युः न तु तासामिह सन्निधानमस्ति। तस्मात्प्रक
रणात्सूक्ष्मानुमं त्रया वइत्कृष्टानि पात्राणि सर्वार्थानीति भाष्योऽधिकरणेन· सूत्रन्तु पूर्वाधिकरण एव पदोत्तरत्वे
न व्याख्येयं· निविन्मीर्व्यवायात्सामिधेनीनामस्योपवीतवा स्यच्चमेदः स्यादिन्यक्ते ननु निविदां सामिधेन्यंगत्वा
गत्वाद्व्यवधायकत्वं स्यादिति ये वदंति तेषामुत्तरं गुणानांच परार्थत्वादिति निविदोपिलिंगेनाग्निसमिंधनेगु

णभूता: सामिधेन्योपि अन्नीतो न तासां मिथः संबंधः।११। मिथाश्वानर्थसंबंभः। दर्शपूर्णमासयोराग्नेयः सोम्यश्चाज्य
भागोविहितौतयोः क्रमेनुणावासाचतुश्चयमाम्नातं अग्नेयी सोमो चेन्ये कंयुगुलं युगुलं युन एग्नेयी सोमश्चित्यय
रंतत्र प्रथमद्वितीयेवा त्र्यघ्नोततीयाचतुर्थोचवृध न्वत्यौ तत्रापरं वचनं वार्त्रघ्नौ पौर्णमास्याम नृध्येते वृधन्वती
अन्वती अमावास्यायामिति तत्रं सशयः किमाज्यमागयोः क्रम प्रासामंत्रासाभ्यामाह्लिघवचनेन प्रधानांग
नयाविधीयंतेउताज्यभागयोरेवाप्यवस्थायाप्राप्तयोर्युगलयोर्व्यवस्थामात्रमिति: तदर्थे चास्मिन्वचने पौर्णमास्या
मावास्याशब्दौ कर्मवचनावुतकालवचनाविति। तत्र: कालस्यास्मरणीयत्वान्नमंत्रेण प्रयोजनं। नापि प्रकरणं त
स्यतेननासाविहोच्यते।१। कर्मणः प्रकृतत्वेनमंत्रापेक्षत्वयापिचलत्यौर्णमास्यमावास्याशब्दाभ्याममिधीयते
।२। सप्तमी पूर्वेधुरमावास्यायामितिवत्प्रधानेप्यविरुद्धा तस्याद्भावेन कर्मवाधित्वाप्रधानार्थौमंत्राकृति नैवं यद्यपि
कर्मैवशब्दाभ्यां प्रतिपाद्यतेतथापि सप्तमी अत्यान प्रधानत्वसंभवः।१। पूर्वेधुरमावास्यायामितिलक्षणान्चेह त
थासुरव्यार्थसंभवात्: न चेह सौम्यमंत्रस्य प्रधानेषु सामर्थ्यमस्ति सोमस्य प्रधानदेवताया असंभवात् अग्नीषो

मोयेप्यग्निसहितस्य देवतात्वं न केवलस्य॥ आमावास्यायां तु नास्त्येव सोमः न च वचनादयथार्थलं लिंगं हि वाक्या
द्बलीयः वाक्याद्धि कर्मणः प्राधान्यं लक्षणाश्रयणान्नश्रूयते: अथापि विधिवाक्यतान्मंत्ररूपं वा वेतयघ वा वेनोप
यघेनन तु व्यवस्था मात्रमपेक्षितमस्त्यं च विदधत्तातराम वार्धैनैव वर्तते पौर्णमासीगतयोरेज्वभागयोर्वान्नि॰
घ्नो अमावास्यागतयोरैंधनत्याविति॰ यद्वा कालद्वारेण व्यवस्था विधीयते इत्याज्ययागयोरेव मंत्राः॥१३॥ आनंनर्य
मवोदना॥ दर्शपूर्णमासयोरन्नायते॥ हस्तावनेनिक्ते उलपराजिंस्तृणातीति॰ तथा ज्योतिष्टोमे मुष्टीकरोतिवाचंय
छतिदीक्षितमावेदपतीति तत्र हस्तावनेजनं हस्तसंस्कारार्थं मुष्टीकरणवाग्यमने च मनः प्रणिधानार्थे ते
न तत्र यमपि लिंगात्करिष्यमाणकर्मार्गिनत्ति मनंतरयोरुलपराजिस्तरणदीक्षितावेदनयोरेव उत्त सर्वांग
मितिसंशयस्तत्रानंतर्यादेकवाक्यत्वादंवातरप्रकरणाद्वातन्मात्रांगत्वे प्राप्तेभिधीयते॥ लिंगप्रकरणाभ्यां
हि सर्वार्थत्वं प्रतीयते॥ क्रमश्च दुर्बलस्ताभ्यामतः सर्वार्थता भवेत्॥१॥ न चास्मा तदयस्य यद्धि घृपबंधर दर्श
दिनस्येकवाक्यत्वं संभवति येन वाक्यैनैव तादर्थ्यं स्यान्न तु च श्रुत्यादिविहितांगसंदंशोऽस्ति॰ येनावांतरप्रकरणं स्या

१६

16

न्। तस्मात्तत्त्वार्थेनास्यात्॥१८॥शेषस्कगुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसंबंधात्॥ दर्शपूर्णमासयोए
मेयाग्नीषोमीयैन्द्राग्नाः पुरोडाशाः तत्राग्नेयं चतुर्द्धाकरोतीति चतुर्धाकरणं किं सर्वेषां भवति उताग्नेयस्यैवेति भ
वति विचारः। तत्र अ[illegible]ः संबंधमात्रेण भवेद्द्रव्योपलक्षणं संबंधस्याविशिष्टत्वात् सर्वेषामुपलक्षणं॥२१॥अ
ग्निस्तावदत्र चतुर्धाकरणविषयद्रव्योपलक्षणमात्रं न स्वयं कर्मयोगीति नासौ यथाश्रुत एव गृहीतव्यः यथे
न देवतात्वम्। तेनैवोपलक्षणं स्यात् किंतु यावता विना न शक्नोति द्रव्यं लक्षयितुं तन्मात्रमादेयं संबंध
मात्रेण चासौ शक्नोति तल्लक्षयितुं संबंधश्चाग्नेराग्नीषोमीयेपि। तस्मात्तस्याग्नेयशब्देन लक्षितत्वात्तस्यापि चतुर्धा
करणं। अथवा देवतात्वमेवास्ति यद्द्विहाम्पादीयते दीयत एव तदेकस्मा अपि। यद्ध्याग्नेरिदमिति संबंधमात्रे
ण्याग्नेयशब्दो भवत्येव सर्वत्राग्निकलिम्पां ठकू वक्तव्य इति स्मरणात् तस्मात्सर्वत्र चतुर्धाकरणमिति प्राप्तेब्रूमः।
केवलाद्देवतावाचो तद्धितोग्नेः समुच्चरन्। नान्ययुक्ताग्निदेवन्य प्रतीयादपि तु स्मृतः॥१॥ देवता भूतस्तावदिहाग्निश
ब्दास्तद्धितेनोपलक्षमुपादीयते। संभवति च तस्य यथाश्रुतस्यैवोपलक्षणत्वं केवलाग्नेयस्यापि संभवात्। अतो

राम

१६

नत्वाह्वानवगतेनसंबंधमात्रेणोपलक्षणत्वकल्पकंविनाकारणेनक्रतुबाधप्रसंगात्॥ अग्नीषोमीयादौतुसमा
साकुत्वस्यनत्वसिद्धितौद्वयोः सापेक्षयोर्देवतात्वमाहृतेनतत्रान्यसापेक्षस्याग्नेर्देवतात्वंनचसापेक्षस्यतद्धि
तेसामर्थ्यमस्तितेनाग्नेयत्वाख्येनत्वाद्येनशक्योत्यग्नीषोमीयादिकमभिवदितुं यद्यपिचसंबंधमात्रेविहितत्वसिद्धि
नत्वथाप्यत्रदेवतार्थतेवाश्रयितव्यालक्षणार्थत्वात्। प्रसिद्धासंबंधेहिलक्षणंभवति। प्रसिद्धिश्चविधिवाक्याद्दे
वतावाक्याविधिवाक्येचाग्नेर्देवतासंबंधएवपुरोडाशेनावगतोनसंबंधमात्रंतस्माद्देवतात्वमेवोपलक्षणंन
त्वाग्नीषोमीयादौनास्तिइत्याग्नेयस्यैवचतत्तुर्धाकरणांयदीपिशातयथब्राह्मणेतंचतुर्धाकृत्वापुरोडाशं
बर्हिषदंकरोतीतिसामान्यवचनंनतद्व्यनेनैववचनेनोपसंह्रियतेइतितस्यैवचतुर्धाकरणंयुक्तमिति। १५
। इतिश्रीदीपिकायां[illegible]कायांतृतीयस्यप्रथमः पादः। अर्थाभिधानसंयोगान्मंत्रेषुशेषभावःस्यात्तस्माद्
त्पत्तिसंबंधोर्थेननित्यसंयोगात्॥ पूर्वपादेश्रुतिविनियोगःप्राधान्येनचिंतितः अधुनालिंगविनियोगश्चिंत्य
ते। विनियोजकत्वंलिंगस्यमंत्राधिकरणसिद्धमर्थप्रकाशनेनोपकुर्वंतीत्यभिधानात् तद्विशेषस्तिदानींचिंत्य

१७

17

नेःलिंगसामर्थ्येनचसरव्यङ्गवगौणेचकथंचिद्विधनेनतदिहासंशयः।किंमुख्यएवायेमंत्राणांविनियोगः।किंवागौणेऽपी
ति।कःपुनर्मुख्यःकेवागौणाःयत्राब्दादेवावगम्यतेसमुख्यःयथाग्निशब्दात्ज्वलनःबर्हिःशब्दाच्चकुशादयःय
स्तुशब्दाभिहितार्थगुणसंबंधात्तत्सदृशोर्थाःप्रतीयतेसगौणःयथाग्निशब्दात्तन्माणवकसहिज्वलतनयेग
त्यादिगुणयोगाद्गम्यतेतथाबर्हिःशब्देनतर्णांतरमुलपादि।ननुप्रयोगप्रतीत्यविशेषादुभयत्रवाचकत्वंक
स्मान्नभवतिनाविशेषःविशेषप्रतीतेः।अग्निरिवमाणवकइतिसादृश्यप्रत्ययाद्गुणादेवचप्रयोगप्रतीत्यय
यत्तैरनेकार्थत्वमन्याय्यंपरगुणःपरत्वनसंभवंतीतिचेन्न।प्रत्यभिज्ञानात्।येपिप्रतिद्रव्यंगुणेभेदमातिष्ठं
तेतेपिसामान्यात्मानेकमिच्छंत्येवतेनोपपन्नोगौणमुख्यविभागइतियुक्ताचिंता।तत्र अर्थानांस्मरणार्हत्वा
न्मंत्राणांचापिशक्तितः।प्रतिप्रधानमावृत्तेर्गुणानामुभयार्थता॥१॥उभयंषामपितावदर्थानामनुष्ठेयत्वा
त्स्मरणमपेक्षितमंत्राश्चार्थंप्रतिगुणभूताःसमर्थाश्चोभयत्रापियथाकथंचित्स्मृतिमाधातुंसाक्षादभिधान
स्यापिस्मरणमेवफलंनाधिकंतच्चगौणसार्थ्यस्याप्यविशिष्टंप्रतिप्रधानंचगुणावृत्तिर्न्याय्यातस्मादुभयत्रविनि

राम

१७

योग इति शान्तेर्भिधीयते। गौणे सत्यपि सामर्थ्ये न प्रमाणान्तरेण हीना आविर्भवति मुख्ये तु शब्दादेवाविरस्तितत्
।२। तात्पर्यं यत्तु स्वतो मुख्ये गौणार्थपरता पुनः प्रमाणान्तरविज्ञेया तदभावान्न सिध्यति। २। न त्वग्निरित्येतावता
प्रमाणान्तरेण गौणे सामर्थ्ये तात्पर्यं वा कथंचिदपि लौकिकाः प्रतिपद्यन्ते मुख्ये तु श्रवणादेव शब्दस्योभयम
वगच्छन्ति नन्वेह प्रमाणान्तरमस्ति येन मन्त्राणां गौणसामर्थ्यं तात्पर्यं वाभिव्यज्येत· न चानाविर्भूते सामर्थ्ये ता
त्पर्ये च शब्दार्थः प्रतीयते तेन गौणार्थो मन्त्रान्न प्रतीयत एव कथम प्रतीयमाने विनियोगः मुख्यस्त्वर्थः शब्दादे
वावगम्यत इत्युक्तस्तत्र विनियोग यस्य तु मुख्येर्थः प्रकरणे नास्ति तस्योत्कर्षः यथा पूषाद्यनुमन्त्रणमन्त्राणां
यस्य तूत्कर्षोपि न संभवति तस्य जपमात्रेणोपयोगः न तु गौणे च मा प्रामाणिकत्वात्तत्रापि च प्रथमावग
तमुख्यविनियोगे नैव कृतार्थत्वान्मन्त्रस्य न तद्दृष्टेन गौणे विनियोगः अर्थोपि गौणो ध्यानाद्युपायान्तरेणापि स्म
र्तुं सिद्धे नोत्मा। न मिधार्यिनं मन्त्रमपेक्षन्ते अतो प्रमाणकस्तत्र विनियोगः मुख्यविनियोगस्तु मन्त्राकांक्षाकृता
म्नतीति तन्त्रैव विनियोगः। ३। वचनाद्वचनाद्वयथार्थमैन्द्री स्यात्। अधवाद आरभ्यते· अग्नेरुपस्थाने निवेशनः संग

मनो वस्स्वामित्येंद्र्या गार्हपत्यमुपतिष्ठत इति। तत्र संशयः किमनेन मुख्यस्यैंद्रस्य प्रकाशनं कर्त्तव्यमुत गौणस्य गार्ह
पत्यस्येति। अ॰ पूर्वाधिकरणन्यायान्मुख्यस्येति प्रतीयते। विनियोज्यानुसारेण विनियोगस्त्वपर्यते। १। न खल्विंद्रा
भिधानस्य मंत्रस्याग्निप्रकाशने शक्तिरस्ति न चाशक्तो शकार्थे विनियुज्यते। २। तेन मंत्रानुसारेण विनियोगार्थ व
र्णनाइंद्रो हि गार्हपत्येन गौण्या वृत्त्याभिधीयते। ३। यज्ञसाधनसाधर्म्याद्यद्वा गार्हपतेर्यतः तेनापं गार्हपत्यः स्यादिंद्रो व
वयवयोगतः॥४॥ द्वितीया वा सप्तम्यर्थे लक्ष्यति गार्हपत्ये स्थित्वोपतिष्ठत इति। यद्वोपतिष्ठत इति द्विक्रिये विधेते समी
पस्थानमात्मने पदानुमितं वाभितं चाभिधानं तत्रैंद्रमंत्रकाणके भिधाने गार्हपत्यस्य कर्मत्वं न संभवतीति समी
पस्थ न विशेषणं गार्हपत्यो भवति गार्हपत्यमुपेत्याभिधत्त इति तस्मान्मुख्य एव विनियोगो न्नाप्योति प्राप्ते भिधी
यते। अन्नो वचनसामर्थ्याद्विनियोगः प्रतीयते। न चात्यंताऽसमर्थत्वं गौणसामर्थ्यसंभवात्। १। यत्र मानांतरं
नास्ति तत्र गौणो न गम्यते। प्रमाणांतरस्य सद्भावे गौणे शब्दः प्रवर्त्तते। २। पूर्वाधिकरणे प्येतद्वर्णितं विधांतत्रेच।
विस्पष्टं वचनं तेन गार्हपत्यार्थनास्फुटा। ३। अवश्यं कल्पनीयं हि मंत्रस्य ब्राह्मणस्य वा। गौणत्वं तच्च मंत्रस्य प्राप्त।

र्थोस्येवयुज्यते।४। अप्राप्तार्थविधौनैवगौणत्वमुपपत्तिमत्। नचावयववयोगेनवृत्तोरूढ्याग्निवेदनात्।५। अ
धानक्रियायाअप्रधानत्वात्तद्व्ययः॥ गार्हपत्यस्यनान्यार्थसमीपस्थितिगामिता।६। तदिहास्तिगार्हपत्येविनि
योगइतिस्थितंसतिचतस्मिन्लिंगादिंअर्थेनापिभवतिनेतिबलाबलाधिकरणेचिंतयिष्यते। तथाह्वानमपीति
चेत्। दर्शपूर्णमासयोरिदमाम्नायते। हविष्कृदेहीतित्रिरवघ्नन्नाह्वयतीति। तत्रसंशयः। किमयंहविष्कृदेहीति
मंत्रोंगंगोऐवघातेप्रयोक्तव्यः॥ किंवामुख्येनहविष्कृदाह्वानइति। तदर्थमिदंविचार्यते किमस्मिन्नवचर्मेवघ्नन्नि
त्यवघातमुपिश्यमंत्रोविधीयतेहविष्कृदेहीत्यवघ्नन्निति किंवामंत्रस्याह्वानेनसंबंधोहंतिरुक्तकाललक्षणा
र्थोहविष्कृदेहीतित्रिरवघ्नन्नित्यवघातकालइति। तत्रपूर्वाधिकरणन्यायाद्विधौयुक्तानलाक्षणा। मंत्रस्यत्व
यथार्थत्वंवचनान्नैवदुष्यति।१। त्रिरितिनहिकथंविधीयतइतिचेन्न। प्राप्तावघावघातोद्देशेनमंत्रस्यत्रिर
भ्यासस्यविधौवाक्यभेदात्। पाठपाक्षात्प्राप्तानुवादत्वाददोषः। मंत्रसमाम्नायेहिमंत्रेत्रिरभ्यस्तमेवकेचिदामनंति। अ
ह्वयतिरपिएहीतिशब्दोच्चारणसामान्याह्वाणः। तस्मादवघातांगंमंत्रइतिप्राप्तेमिधीयते। त्रिरभ्यासेनपाठेननिस

१९

19

प्रप्राप्तोयत। कश्चित् उद्देशः पठ्यते सकृच्चापि तस्मान्नायमनूद्यते। २ न पाक्षिकानुवादत्वं नित्यान्वयविरोधतः। तस्माद्
त्रित्रिरभ्यासो विधातव्यस्तथासति। २ मंत्रस्य न विधिः शाकोवाक्यभेदप्रसंगतः। आम्नानेन तु मंत्रस्य योगोहं
हंतिस्तालक्षण। ३ नन्वेवमप्याम्नानमनूद्य त्रिरायासो हंतिकालश्चविधीयत इति वाक्यभेदः स्यात्। लैन अर्थप्राप्तत्वा
त्। अवघातकाले स्वसहायात्कनमर्थप्राप्त अतोनुवाद्यमात्रमात्राव हंतिरनुवादत्वादेव लक्षणयापिन दोषः। नवापि
चाविनिःशब्दं ब्राह्मणे ऽजघन्यस्त्वाभ्ययणं आत्द्रयते गौणत्वात्। अपि च नात्रै घ्रातिवच्छेतो विनियोगः किंतिति क
रणा वमत्स्यमंत्रस्यावघातस्य च सचसमभिव्याहारात्संबंधमात्रं गम्यते तत्र सति संभवे गांगिभावः स्यात्। स
तु वाक्यभेदान्मंत्रलिंगविरोधाच्च न संभवतीति एककालत्वेन व संबंध इति गम्यते। न खल्वेहोतिपरप्रेषपासूप
स्य हविष्कृदित्ति च संबोधनरूपस्य चेतनेनेव घाते सामर्थ्यमस्ति। तस्मात्त्रिरेवेति मात्रविधानाद् आम्नानं गंमत्रो
नाथ यथार्थैवघाते। ३ न तथोपा। उत्तिष्ठन्नन्वाहाग्नीदग्नीदन्विहेरेति। नत्वपूर्णुनेति वाचं विसृजतीति अत्रापि पूर्वे
वैवत्संशयपूर्वोत्तरपक्षाः वाक्यभेदात्त्विहांगांगित्वपक्षेपि नास्तीति न देवयुक्तमिति तिविरोधात् शंकाश्रुतिविनियोगा

राम

१९

भावात्तु मंत्रलिंगविरोधादस्यापि कालार्थ एव संयोगः कालश्चेह विधीयते तेन पूर्ववदनूच्येत इति विशेषः।४। सूक्त
वाके कालविधिः परार्थत्वात्। दर्शपूर्णमासयोः श्रूयते सूक्तवाकेन प्रस्तरं प्रहरतीति। तत्र संशयः किं प्रस्तरप्र
हरणस्य सूक्तवाकस्य च कालार्थः संयोगोऽथवांगांगिभाव इति। तत्र द्वयोः कृतार्थत्वान्नांगांगित्वं प्रकल्प्यते। का
लार्थस्तेन संयोगस्तयोर्दर्शादिवभ्रुवेत्।१। यथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्युभयोः कृतार्थत्वात्का
लार्थः संयोगः तथेहापि सूक्तवाकस्येष्टदेवताभिधानेन कृतार्थत्वात्प्रहरणस्य च नानाकर्मोपयुक्तप्रस्तरप्रति
पादनेन प्रयोजनवत्त्वादंगांगिताया अभावात्कालार्थः संयोगः तत्रापि निर्ज्ञातकालत्वात्सूक्तवाकः प्रस्तरप्रह
रणकालं लक्षयति तृतीया चेच्छ्रूयते लक्षणं भविष्यति न हि कथंचिदपि देवताभिधायिनः सूक्तवाकस्य प्र
हरणांगता संभवति प्रहरणे देवताभावात् अतः कालार्थ एव प्राप्ते ब्रूमः। श्रुत्या प्रहरणांगत्वं सूक्तवाकस्य प्राप्यते। तेन त
द्देवयोगाद्देवहोमोऽपि भविष्यति।१। तृतीयाश्रुत्या सूक्तवाकस्य करणत्वं गम्यमानं न लाक्षणिकत्वं युक्तं न चेच्छ्रूयते लक्ष
णेन तृतीयेयं कारकविभक्तेर्बलीयस्त्वात्। किं च लोपत्वं सर्वो हि संबंधः क्रियागर्भ एव सूक्तवाकप्रस्तरप्रहरणयो।

२०

लेक्षणक्रियायागमोयंसंवंधः नचेहतनक्षणक्रियोपात्तानामुपात्तानामपेक्ष्यायंसंवंधः प्रत्येतव्य इतिविप्रकृष्यते। क्रि
याकारकसंवंधस्तुनान्यापेक्ष इतिवलीयस्त्वंतेनकरणमवसूक्तवाकः पद्यपीष्टदेवताप्रकाशनेनासौकृतार्थस्त
थापिविनियुज्यतेवचनात् किंहिवचनंनकुर्यात् कथंपुनर्देवताभिधायिनः प्रहरणांगताश्रुतिः विनियुक्तंमंत्रां
गत्ववलाद्देवतरभिधेयाभिरिष्टदेवताभिः संयोगः प्रहरणस्यकल्प्यतेनेनायंप्रहरतिरिष्टहरतिरिष्टदेवता
संस्कारार्थोहोमोभविष्यति। तेनोपपन्नमिष्टदेवताप्रकाशनंकुर्वतएवसूक्तवाकस्यप्रहरणांगत्वं। प्राकृतत्वोपदे
शादुभयत्रसर्ववचनोप्रहरणांगंसूक्तवाकरतिसिद्धं तं इदानीमिदंसंदिह्यतेकिंकृत्स्नः सूक्तवाकः पौर्णमासा
ममावास्यापांचप्रयोक्तव्यउतेष्टदेवतानुरोधेनवितत्यप्रयोग इति। तत्रसूक्तवाकशब्दस्यसमस्तानुवाकस्यकृ
कचवनत्वेनाध्येतॄणांप्रसिद्धेरग्नेयादिभावनानांषण्णामप्यन्योन्यनिरपेक्षाणामेवकर्थंभावात्मकप्रकरण
वत्वादेकैकस्यकर्मणः सकलः सूक्तवाकोगंप्रयाजादिवत् तत्रसत्यप्येवमेककालवर्तिनांत्रयाणांतंत्रेणप्रया
जादिवत् उपकरोतीतिभेदेननप्रयोक्ष्यतेसमुदायद्वयेतुकालभेदात्सकृत्प्रयुक्तस्यैवावृत्त्यात्तद्वितर्यंनविष्टदेवताप्रका

राम

२०

शनार्थो मंत्रोयं प्रहरणमपीष्ट देवतासंस्कारार्थमित्युक्तं तत्रामावास्यादेवतापदानि पौर्णमास्यां न प्रयोगार्हाणि
प्रयोगजनाभावात् इत एवापवीतरत्रेति विभाग एव प्राप्नोति नैव वचनाद्धि सकलप्रयोगो गम्यते तत्राविषमा
नार्थान्यपि पदानि अदृष्टाय प्रयोक्ष्यंते वचनादिति उपपद्यते विभन्यप्रयोगः अपीजव च व चनादित्युक्तो हेतुः न
ही द्रव्यादि शब्दानां पौर्णमास्यां प्रयोजनं नाप्यग्नीषोमादि शब्दानामितरत्र प्रयोजनं यत्तु वचनादित्युक्तं तन्न
सूक्तवाक शब्दस्यावयवस्तुत्यत्वादिष्ट देवताप्रकाशकं मन्त्रवचनत्वान्सूक्तं वक्तीति सूक्तवाकः तेन पङ्क्तिस्मिन्प्रयो
गे याक्ष्यो देवताः इष्टा एका वा द्वे वा तिस्रो वा प्राकृत्यो वैकृत्यो वा तत्र तावद्देवतापदप्रयोगादेव संपूर्णः सूक्तवाक इति रि
क्तानिष्ट देवतापदप्रयोगे प्रत्यक्त सूक्तवाकत्वं स्थिताद्रुरुकवाक एव स्यात् तस्मादिष्ट देवतानुरोधेन तिष्कर्षः ॥ ६
लिगंक्रमसमाख्यानात्काम्ययुक्तं समाम्नानं ऐंद्राग्नमेकादशकपालं निर्वपेदित्यारभ्य इंद्राग्न्यादिलिंगाद्रूपपः स
माम्नाताः तैनेव लिंगक्रमेण काम्ययाज्यानुवाक्याकांडमित्येव समाख्यातं मंत्रकांडं साम आम्नातं इंद्राग्नी रोचना
दिव इत्यादि तदितमंत्राकीसंशयः किं यत्र यत्र सामर्थ्यमस्ति तत्र सर्वत्र विनियोक्तव्यास्तत्राः क्रमसमाख्येवाधिता

२१

उक्तंतद्द्वारेणकाम्येष्टिष्वेवेतितदर्थेचलिंगमपिइक्षत्यादिवन्निरपेक्षमेवविनियोजकं उक्तक्रतुसंबंधबोधक
प्रमाणमन्यदप्यपेक्ष्यमाणं यावद्विरोधमात्रेलिंगस्यप्रामाण्यमिति। तत्र· लिंगस्याप्यनपेक्षस्यमन्यतेवि
नियोक्तृत्वं। तद्दूलीयः क्रमाख्याभ्यामितिसर्वार्थताभवेत्॥१॥ स्वाध्यायविध्यध्यापितस्यतावन्मंत्रस्यावत्र
पंप्रयोजनेनभवितव्यंतत्रमंत्रस्वरूपमेवदृष्टः स्याप्रकाशकोपमत्तोत्रविनियोक्तव्यइतिबुद्धिरुत्पद्यते
नचनिःप्रयोजनस्यप्रकाशनमर्थवदितितद्द्वारेणतत्संबंधिकार्मापूर्वार्थत्वमपिततएवगम्यतेकिमत्र
प्रमाणांतरेणतत्त्वं। क्रमसमाख्याभ्यांप्रबलमितितद्बाधेनलिंगात्सर्वार्थ्येतिप्राप्तेब्रूमः। संत्वेप्रयोजनापे
क्षामंत्रस्यास्तितथापितु। नैवसामर्थ्यमात्रेणविनियोगोस्यसंभवी॥१॥ नस्थेयेक्षितमपिप्रयोजनंप्रमाणमंत
रेणालब्धुंशक्यंनचसामर्थ्यमात्रेणाप्रयोजनंकिंचित्समर्प्यतेऽग्न्यादिस्वरूपमात्रप्रतिपादनंसामर्थ्यादव
गम्यतेनचतावन्मात्रप्रकाशनेफलमस्तिकर्मापूर्वसाधनरूपप्रकाशनार्थतातुनकर्मसंबंधप्रमाणमन्यं राम
दंतरेणसामर्थ्यमात्रात्सिध्यति। पूषाप्रतिपिष्टभागदत्यत्रतुयागशब्दस्यत्यागवचनत्वात्क्रतुसंबंधसिद्धि २१

रितिवक्ष्यामः। न चाग्निसूर्यादीनां स्तुत्यादिवक्तव्यभिचारे येन क्रतुरूपस्थाप्येत लोकेपि तत्संभवात्। इंद्रादीना
पि मंत्रार्थवादेतिहासादिभिः कर्मणोन्यत्रापि प्रतीतेः तस्मात्क्रतुसंबंधप्रमाणमन्यदपेक्षितव्यं न च मंत्रकां
डस्य क्रमसमाख्याभ्यामन्यत्प्रमाणमस्ति ते च काम्येष्टिष्वेवेति तत्रैव विनियोगो न कर्मांतरेषु न च कर्मांत
रेषु स्मरणापेक्षापि येषां मंत्राणां तत्र विनियोगः तेषामुपायांतरेणापि स्मृतिसिद्धेरेकांततो मंत्रानपेक्षणात्त
स्य तत्वेकांततस्तत्र प्रवृत्त्येव सामर्थ्यमात्रादपि तादर्थ्ये यथार्थज्ञानस्यानुष्ठानागतत्वं न हि तद्विनानुष्ठानं सि
ध्यति यथा वात्मज्ञानस्य सांपरायिकफलकर्मानुष्ठानोपयिकत्वं देहत्वेकांताभावान्न कर्मांतरेषु विनियो
गः क्रमसमाख्यावशात्तु काम्येष्टिष्वेव यथासमाख्यं च याज्यानुवाक्यात्वेन विनियोगः संभवतामसंभवता
मपि तात्स्वेव सामिधेन्यादौ क्रमसहितेन लिंगेन विनियोगः। ७। अधिकारे च मंत्रविधिरतदाख्येषु शिष्टत्वात्।
ज्योतिष्टोमे कश्चिदाग्नेय्यो ऋचोऽग्न आयाहि वीतय इत्यादयो विशेषरूपेण संयुक्ताः पठिताः स्तोत्रादौ च वाक्यांत
रेण विनियुक्ताः प्रदेशांतरे चाग्नेय्याग्नीध्रमुपतिष्ठते इति श्रुतं तत्र विचारः किं प्रकृताभिरप्रकृताभिर्वाग्ने

२२

आयाहि वीतय इत्यादयो विशेषरूपेणासंयुक्ताः पठिताः स्तोत्रादौ च वाक्यांतरेण विनियुक्ताः प्रदेशांतरे चाग्नेयीभिरि
दं सपस्थानं कर्तव्यमुत प्रकृताभिरेवेति। तत्राग्नेयीति शब्देन सर्वासामभिधानतः। अविशेषेण काचिद्धि प्रकृत
त्वग्रहणे प्रमा। १। प्रकरणाद्धि शेषोवगम्यत इति चेन्न प्रकारणस्याविशेषकत्वात् यदि त्वाग्नेयीसंस्कारार्थमि
दमुपस्थानं स्यात्तत्तो पूर्वसंबंधिनः संस्कारयोगात्तत्साधनभूताः प्रकृता गृह्येरन् उपादीयते त्विहाग्नेयीत
त्वोपानिर्दिशात्। अतः शब्दार्थमात्रस्यैवागत्योपपद्यते नेम कृत नियमः प्रकृतं नियमः सन्निधानादिति चेन्नत
द्भावात् प्रदेशांतरेहि स्तोत्राद्यावाग्नेय्यो विहिताः ननूपस्थानविधौ कस्यैश्चिदाग्नेय्याः सन्निधिरस्ति यतस्त
द्विषयो यमाग्नेयीशब्दः स्यात्। अस्तु वा सन्निधानं तथापि स्तोत्रादिकार्यांतरार्थत्वान्निराकांक्षा नात्र संबधु
मर्हति न स्वन्यार्थेन सन्निहितेनाप्यन्यो विशेष्यते यथाश्वेन गच्छति श्वेतेन पटेन प्रावृणुत इति पटसंबंधे
न निराकांक्षेण सन्निहितेनापि श्वेतगुणेनाश्वो न विशेष्यते तथेहापि न चाग्नेयीशब्दस्याप्यस्ति विशेष्यापेक्षा
यथा श्रुताग्नेयीशब्दस्याश्वमात्रस्यैव वाक्यार्थे समन्वयोपपत्तेस्तेनोभयोर्निराकांक्षत्वात्सत्यपि सन्निधौ न

राम
२२

मिथः संबंधः अपेक्षितसन्निधिर्हि संबंधकरणं न सन्निधिमात्रं एवं सत्यपि यदा विशेष्येत अकृतिजनितो विशे
षप्रत्ययबाधात्तु नि रेव बाधिता स्यात्। ननु योगिकत्वादाग्नेयीशब्दः सन्निहितामेव व्यक्तिमवलंबते नैवमयमवार्थ
समन्वितव्यक्तिमात्रवचनो यौगिका न सन्निहितवचनाः प्रमाणांतरेण तु विशेषविष्यामाणास्तत्रैव यथा विप्रियं नेय
यावैश्वदेव्यामिक्षेति तद्धितः सन्निहितामामिक्षामेवाभिधत्ते न त्वत्र विशेषकमस्ति सतोपि सन्निधेरन्यार्थत्वे
तेन विशेषकमस्ति सतोपि सन्निधेरन्यार्थत्वेनाविशेषकत्वात्। न त्वत्र न चात्र सोमस्यैवैंद्रवायवत्वमननुवाद
नाग्नेयोत्वं विधीयते येनानुवादस्य सन्निहितगामित्वात्सन्निहितान्कृचः प्रतीयेरन्। आग्नेयीनां तु सतीनामुप
स्थानं प्रत्यपादानान्न तस्मात्सत्यपि सन्निधावविशेषः न च सन्निधिरप्यस्ति प्रदेशांतरेण तत्वादित्युक्तं तस्मादा
ग्नेयीमात्रहणमिति सिद्धे अभिधास्यते। प्रकृता एव गत्वेरन्प्रसिद्धकृतुसंगमाः। तासां कार्यविशेषो ह्यसु खमत्रे
पदिश्यते।१। आग्नीध्रोपस्थानस्य हि द्वे रूपे अग्नीध्रोपस्थानता ज्योतिष्टोमापूर्वसाधनोपविकव्यापारता चेद्द्वय
मपि च शास्त्रैरेवावगंतव्यं अन्यतरेणाप्यन्यतरस्य सिध्यभावान्न हि ज्योतिष्टोमगतो यो व्यापारः स आग्नीध्रोपस्था

२३

23

नात्मकएवेतिनियमःसमस्तिनाप्यग्नीध्राविषयमुपस्थानज्योतिष्टोमगतव्यापारएवेतिनियमःसमस्तिज्योति
ष्टोमानोपयिकस्यापिस्यन्द्रादिवदभिधानस्याग्नीध्रविषयस्यसंभवात्तेनैकेनशास्त्रसिद्धेनान्यतरस्यार्थो
पस्यानुमानेनवासिध्यभावात्ःद्वेअपिरूपेशास्त्रतोवगंतव्ये।नघेघेप्रकृताभिरुपस्थानंविधीयेतनततस्या
पस्थानरूपमेवक्रतेलेभ्यतेननुज्योतिष्टोमव्यापारत्वमश्रुतत्वात्तच्चकर्मानोपयिकेनोपस्थानमात्रेण
फलमस्तीत्यनर्थकंवाकर्मस्यात्फलंवाकल्पेततानन्वघावतादिवडुपस्थानस्यप्रकरणात्क्रतुव्यापारतासिध्य
तिसत्यंसितिनश्रुतिमकल्पयित्वाप्रकरणस्यस्वतःप्रामाण्याश्रयभावात्तुवाकल्पनयोपयत्नोकल्पनायु
क्तातथाविधेरंस्यात्ःश्रुतिसिद्धमुपस्थानत्वंप्रकरणाकल्पितंचक्रतूपकारव्यापारत्वंउभयमपित्यनेनै
वविधिनातव्यंआग्नेय्याक्रतुंप्रत्याग्नीध्रोपस्थानरूपंव्यापारंकुर्यादितिनहिप्रकरणंविधायकंश्रुतिसंवं
धप्रमाणत्वात्।यथाव्रीहीनवहंतीतिश्रुतिसमर्पितव्रीह्यवघातसंबंधंविधिरेवावहंतीतिविधत्तेनह्यदिहापिप्रका
रणकल्पितंक्रतुसंवंधमपमेवविधिर्विदध्यात्श्रुत्यर्थंचोपस्थानरूपमितिगौरवंस्यात्।तदिदमवघातादि

एम
२३

श्रुतत्वस्माद्वांगीकृतं इह प्रकृतग्रहणेन गतौ सत्यां न गौरवमाश्रयणं युक्तं। तथा हि प्रकृतानां प्रागेव क्रतु
तौ व्यापारः कर्त्तव्यत्वेनावधारितः तस्यावधारितव्यापारस्याग्नीध्रोपस्थानात्मकविशेषरूपमेवात्र विधीयते
य आग्नेय्याः क्रतौ व्यापारः कर्त्तव्यः स आग्नीध्रोपस्थानरूप इति तेन प्रागेव कल्पितं विहितं चाग्नेय्याः क्रतुव्यापा
रमनूद्य विशेषमात्रं क्रतुयागमपीह विधीयते नास्तीह क्रतुव्यापाररूपं कल्प्यते तेन नापि विधीयत इति लाघवा
त्प्रकृतग्रहणमेव युक्तं नन्वेवमग्निमुपनिधाय स्तवीतेत्यत्रापि प्रसिद्धक्रतुसंबंधानामाहवनीयादीनामेवोप
धानं स्यान्न लौकिकाग्नेः। नैष दोषः देशविशेषनिबद्धत्वादाहवनीयादयो नाहत्य वचनमंतरेणान्यत्र नेतव्याः
श्रूयते हि तेषामायतनाद्धिर्गमने दोषः प्रायश्चित्तं च विहितम् एवं इन्द्रियेण वीर्येण रूध्यते यस्याहिताग्नेरग्निरप
क्षायतीत्यादि। तस्माल्लौकिकस्य ग्रहणं तु प्रकृतानामेव लाघवादित्युक्तं तत्तु प्रकृतानां क्रतुकार्यं विशेषस्तोत्रादिर्ज्ञा
त एवास्त्यं सामान्यरूपमपि तावत्स्वाकरपाठज्ञानं तन्मात्रेण तानि प्रयोजनं विशेषरूपं तु वाक्यान्तरेण वि
हितं विशेषान्तरेणानपेक्षितत्वादनादृत्य सामान्यरूपमपेक्षितं गत्वं नेतस्मात्प्रकृताभिरुपस्थानं पूर्वलिंगस्य सा

२५

मात्रसंबंधायेष्टित्युक्तं तत्प्रसंगात्कृतेरपि सति संभवे सामान्यसंबंधमन्यनः सिद्धमपेक्ष्य विशेषमात्रपरत्वं संभव
नीति प्रतिपाद्य तत इति लिंगाधिकारे क्रतिविनियोगश्चिंतितः ॥ ८ ॥ लिंगसमाख्यानाभ्यां भक्षार्थतानुवाकस्य ॥ भक्ष
मंत्रः श्रूयते भक्षेहि मा विश इत्यादिस्तस्य कश्चिदंशो भक्षणं प्रति प्रादप्रतिग्रहणावेक्षणसम्यग्जरणप्रकाश
काश्चान्येंऽशाः ॥ तत्र संशयः किं सर्वोयं भक्षणे विनियोक्तव्यः उत ग्रहणादिषु विषययासामर्थ्यं विभज्य विनियोग इति तत
दर्थे च किमर्थप्राप्तेषु मंत्रस्य लिंगं विनियोजकं न वेति · तत्र सर्वस्य भक्षस्यांगत्वं ग्रहणादेरचोदनात् ॥ अक्रत्वर्थो
न मंत्रस्य द्वारी भवितुमर्हतीति ॥ ९ ॥ भक्षानुवाकसंज्ञा च भक्षणांगत्वबोधनी ॥ सामर्थ्यं चास्ति मंत्रस्य भक्षणे तद्विशेष
णात् ॥ एवं यद्यपि चावरव्येषमित्येवमादेरवेक्षणादौ मुख्यसामर्थ्यं क्लृप्तं तद्विशेषितभक्षणप्रतिपादने च लक्षणा
या तदेकवाक्यत्वेन कल्प्यं लघु व्यर्थत्वं च वाक्यलिंगानन्यथाविमुख्यस्य ग्रहणादेरर्थप्राप्त्याऽचोदितत्वेनाक्रत्वर्थ
त्वात्तादर्थ्ये मंत्रस्य कृतत्वपूर्वानुपयोगितयानर्थक्यापत्तेरसंभव इति लिंगविनियोगे सवित्रादित्यादिमिवलक्षणयाया वा
क्येन प्राग्रूक्कालवर्तिग्रहणादिविशिष्टचोदितभक्षणार्थता यथा काष्ठद्रीतावेक्षसम्यग्जरणाद्यक्षयामीति ॥ एव

रम
२५

चानन्यविषयत्वाद्भक्षानुवाकसमाख्याप्युपपन्नातस्मात्सर्वेनुवाकोभक्षागमेकं वाक्यमितिप्राप्ते ब्रूमः। ग्रहणा
संस्पर्शाभावात्. उक्तं हि लौकिके चाऽनुष्ठाने यदि लौकिकात्प्रमाणान्न प्रत्यवायो नावगम्यते कुतोऽयमन्यतः शक्यतेव
गंतुमिति अतो न नञर्थविधिपरेण वाक्येन यातनायाः कर्मत्वं शक्यमेव बोधयितुं अनयसम्भावात्. वाक्येने
व तत्प्रतिपादने वाक्यभेदः अवग्रहरणाभावे नापूर्वं कुर्यात् अवगूरणं च प्रत्यवायफलमिति तस्मान्न फल
त्वं न गम्यते वग्रहरणस्य साध्यत्वायातनायाः सत्यं गम्यते किं मूलातियमवगतिरिति प्रमाणमस्यां मृगयमाणा न
लभामहे प्रत्यक्षादीनां दृविष्टत्वात् शब्दस्य चान्यपरत्वेन तत्र प्रामाण्यायोगात् निर्मूलावगतिरुत्पन्नापि प्रति
वन्न समीचीना भवति अथापि वाक्यभेदमंगीकृत्य शब्दस्यात्र प्रामाण्यमुच्यते तथाप्ययुक्तं कार्यपरत्वेन हि
शब्दानां व्युत्पत्तिः अवगूरणं च यातनाफलसाधनमिति सिद्धरूपो विनियोगः कथमिव शब्देन प्रतिपाद्येतव्यु राम
त्पत्तिविरहात्. कथं चावगूरणं क्षणिकं कालान्तरभाविनीं यातनां साधयेत् अपूर्वद्वारेणेति चेन्न अन्यद्वारेणा ४८

न्यस्य साधनायोगात्प्रयोगेवायागादेरपि तथात्वोपपत्तेरपूर्वाभिधानमुक्तोदेनं दिहापि यागादिविषयमिवावगूरण
विषयकं कार्यांकन्तमपूर्वमभिधेयमापद्येत नन्वैवमिष्टं तस्मादर्थवादमात्रमिदं वनुफलं स्यादित्यास्तां तावत्।
प्रागवरोधान्मलवद्वाससः। दर्शपूर्णमासयोः श्रूयते मलवद्वाससा न संवदेदिति किमयं प्रतिषेधः क्रत्वर्थः पुरुषा
र्थो वेति संशयः प्रकरणात्क्रत्वर्थत्वे प्राप्ते ब्रूमः तामवरुध्य यजेतेति वचनात्सर्वस्मादेव क्रतुव्यापारान्निवृत्तार
जस्वला तेन नानया सह संवादस्य क्रतौ प्रसक्तिः प्रसक्त्यभावाच्च प्रतिषेधानुपपत्तिः पुरुषस्य हि स्वातंत्र्येण प्र
वर्तमानस्य रजस्वलया प्रसज्यते संवादः तेन यत्र प्रसक्तिस्तत्र प्रतिषेध इति पुरुषार्थता। अप्रकरणे तु त
द्धर्मस्ततो विशेषात्। अनारभ्य श्रूयते तस्मात्सुवर्णं हिरण्यं भार्यमिति तत्र संशयः किं हिरण्यधारणमि
दं क्रत्वंगतया विधीयते उत क्रतुगत क्रतुगतहिरण्यानुवादेन धारणसंस्कारो विधीयते अथवा हिरण्यं हस्ते भ
वतीति विहितधारणानुवादेन सुवर्णता शोभनरूपता विधीयते यद्धिरण्यं भार्यं तत्सुवर्णमिति आहोस्विद्धिर
ण्यधारणं पुरुषार्थतया विधीयत इति तत्र पुरुषार्थत्वपक्षे हि फलं कल्प्यमतः क्रतोः। अंगं स्याद्वैदिकत्वेन क्रियात्वे

४९

49

नच साम्यतः ॥१॥ यद्यपि तावद् हिरण्यविशिष्टधारणविधिः तथापि तस्य फलापेक्षायां वैदिकत्वक्रियात्वसाम्याद् वैदिककर्मे
वकर्मोपतिष्ठत इति तादर्थ्यमेवाएड पक्रियारूपेणापि युक्तं नात्यंतानुपस्थितिफलकल्पना अथवा धारणस्य
स्वभावत एव तत एव धार्यमाणसंस्कारत्वात् क्रत्वर्थक्रत्या च हिरण्यस्य प्राधान्यावगमान्निष्प्रयोजनस्य च लौकिक
स्य संस्कारायोगात् क्रतुगतहिरण्यानुवादेन धारणसंस्कारविधानं अथवा लाघवाद् धारणमप्यनूद्य सुवर्णता
विधिः त्रेधापि तावत् क्रत्वर्थं नेति प्राप्ते ब्रूमः । न क्रतुस्तद्धिरण्येण्यपवा धारणं वात्र गम्यते । तस्मान्न क्रतुसेषत्वं विधेस्तु
पुरुषार्थतेति प्राप्ता ॥१॥ स्वर्गाद्यत्यतेरपि क्रियात्वादन्यत्र च वैदिकताऽध्ययनमपि तुल्यं यद्युपस्थापकमिति तिनैकांततः
क्रतोरुपस्थानये न वित्त्रि स्ववि धिपक्षेपि क्रत्वर्थतास्यात् न च क्रतुगतहिरण्यप्रतीतिर्येन तदनुवादेन संस्कारवि
धिः स्यात् लोकेपि हिरण्यस्य श्रावान्नहि क्रत्वर्थं द्रव्यार्जनं येन वहिः न क्रतुद्रव्यमेव न स्यात् पुरुषार्थेहि तद्धितत्व
त्वर्थे वक्ष्योमः ननु क्रतुगतहिरण्यप्रतीतिः संस्कार्यत्वादिति चेन्नेतोरतरा अयत्न क्रतुगतहिरण्यानुवादे निश्चये
ये संस्कार्यत्वं तन्निश्चये च निश्चयो न स्यात् तदयोगात् क्रतुगतहिरण्यप्रतीतिरितीतरेतराश्रयत्वं नाहि स्वभावतः

राम

४९

सस्कार्यत्वं अदृष्टार्थत्वेपि धारणाविरोधात् कृत्यप्रत्ययस्य कर्मत्वसाध्यतामात्रमाह न त्वौषिलं अत एव न धारणानु
वादेनापि गणविधिः कल्पतु गन धारणाप्रतीतेरन्यत्रापि धारण संभवात् अतो न क्रत्वंर्यविधिवद्गणश्चावक्ष्यं भवितव्यं
यं फलेन तत्रार्थवादाभावे सस्वर्गः स्यादिति समाधत्ते तुल्यत्वतमेव फलं यथोहश्रात्वयस्यड्वेर्गत्वं आत्मनश्चश्रो
भनरूपतात्स्मात्पुरुषार्थता॥त्रोषोप्रकरणेविशेषात्सर्वकार्मणां क्रत्वर्थपुरुषार्थविचारप्रसगात्पूर्वाधिकरणेना
रम्यवादः प्रसक्ततः तत्प्रस्तावादेवानारम्याधीतानां जयादीनां वाक्येनैव कर्माङ्गत्वे सिद्धे तद्विशेषः श्चिंत्यते येन क
र्मणास्तैत्तन्त्रं जयान् जुहुयादिति किं सर्वेषां लौकिकवैदिककर्मणां जयादयोंगमुत वैदिकानामेव येष्वाह
वनीयोस्तीति विचारः॥तत्राविशेषतः सर्वकर्मार्थत्वं प्रतीयते।तस्मात्कृष्यादिनापीत्सेन त्राग्नौ जुहुयाज्जया
न्॥१॥यद्यपि कृष्यादीनामाहवनीयो नास्ति जयादयश्चाहवनीये होतव्यास्तथापि तेस्वयमेव होमत्वादाहव
नीयप्रयोजका इति तदर्थमेवाहवनीयं प्रणीयते जुहुयमानानन्दुष्यति।तस्मात्तत्रापि अवैगुण्यात्सर्वार्थाः स्फ
जयादयः।नैवं प्रधानवैदेश्याद्वैगुण्यं जायते यतः॥१॥यद्यप्याहवनीयाभावकृतं नास्ति वैगुण्यं तथापि प्रधान

देशत्वमंगानामवगतंतत्रलाभात्कृष्यादिक्रियमाणाविगुणाविगुणाभवेत्सःक्षेत्रेकृषिरेहवनीयेचहोमइतिवै
देश्यंवैदिकेषुत्वाहवनीयादिमत्सुप्रधानसादेश्यमुपलभ्यतइत्यवैगुण्यात्तत्रैवजयादयःदोषातिष्ठिर्लौकिकेस्या
च्छास्त्रातिद्वैदिकेनदोषःस्यात्।अत्राप्यानारभ्यवादस्यैकक्रत्वर्थपुरुषार्थत्वविचारः।तैत्तिरीयकादिकाम्येष्टि
ष्टिकांडेयावतोश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्।वंपेदितिसमामनंतिसेयंदातुरिष्टिर्नप्रतिग्रहीतु
रितिवसन्तेस्याविचार्यतेकिंलौकिकेश्वदानेमित्रदायदेभ्यःस्नेहादिनाविधिमनपेक्ष्यक्रियमाणेनिमित्तेपुरुषार्थ
तयाविधीयतेउतवैदिकेकर्मांगाश्वदानेज्योतिष्टोमपौंडरीकादिविषयेक्रत्वर्थतयाउतोभयत्रेतितदर्थंचदोषनिर्घा
तार्थेयमुतनेतितत्राविशेषादुभयत्रेतिप्राप्तेब्रूमः।दोषनिर्घातकार्येयंयत्रासौनतत्रगम्यते।लौकिकेसचदोषो।
स्तिवैदिके।नविधानतः।१।यद्यपिनिमित्तावस्थायांदोषवान्योश्वप्रतिग्रहइत्यत्राशंकाविशेषेशुंविशिष्टानुवादेवाक्यभे
दात्तथापिकर्मणःफलापेक्षायांसएवैनंवरुणपाशान्मुंचतीतिवाक्यशेषात्तदीयदोषनिर्घातएवफलमवसीयते
तेनयत्रदोषःतत्रेष्टिःलौकिकेचाश्वदानेनकेप्रमरिणोददातीतिनिषेधाद्दोषोस्तिवैदिकेत्वकर्मांगदानेविशेषविधा

प्रवृत्ते नोऽस्ति दोषः तस्मात्कार्यवत्त्वात् दृष्टिर्लौकिके स्यात् उच्यते दोषनिर्घातकार्यत्वे स्यादेवं न तु तत्तथा वरुणग्रहनि
र्मोकः फलमत्रावगम्यते लौकिके नाश्वदानेन नासावस्तीति गम्यते वरुणपाशान्मुंचतीति हि वरुणग्रहाज्जलोदर
पर्यायान्निर्मोकः न च लौकिकमश्वदानं जलोदरनिदानमिति प्रत्यक्षादिना वैद्येसद्भिताभिर्वा गम्यते नापि प्रति
षेधेन न केसरिणो ददातीति पापमात्रकल्पनात् न चानेनैव तत्प्रतिपादनं अस्य प्रसिद्धदोषानुवादे न तन्निर्मो
कार्थे प्रायश्चित्ते स्थितिविधिपरत्वात् तत्परत्वे वाक्यभेदात अतो योऽत्र दोषो निर्घात्यत्वेन म्यते नासौ लौकिकेऽस्तीति न त
दृष्टेन लौकिकविषयत्वं अथ वृणोतीति व्युत्पत्त्या वरुणशब्दः पापमेव वदेत्तमतः प्रसिद्धं परित्यज्य यौगिकार्थं चिका
ख्यायमाने वैदिकेऽपित्यागात् उः खद्दृष्टो नातदेव वरुणशब्देन शासमभिधातुं दे क्ष्याडर्वरविदिनोदेनमितत्वेनो
द्दिश्यते मिपाशान्मुंचतीति चोपपन्नं तस्माल्लौकिकषयतानाप्यभयत्र कुतः प्रसिद्धं स्वश्वदानं निमित्तत्वेनोद्दि
श्यते मिति कं कर्म विधीयते तस्य पूर्वं प्रसिद्ध्यावालोच्यमानायां नेमितिकस्य वैदिकत्वात् तत्सादृश्याद्वैदिकमे
व द्वादानं शीघ्रमुपतिष्ठते न तत्संबंधिकत्वयस्थानागतादर्थ्यं गम्यते तश्च नैरपेक्ष्यान्न लौकिकस्य स्मृद्धः फलक

५१

51

स्यनावापुज्यते। किं तु लौकिके पुरुषार्थत्वं वैदिके क्रतुसेषता। न चैकस्योभयार्थत्वं वैरूप्यादुपपद्येते॥ क्रत्वर्थत्वे प्र
धानविधिपरत्वात् प्रयोजकता। पुरुषार्थत्वे तस्यार्थत्वात् प्रयोजकत्वमिति वैरूप्यं न च तदेकस्य विधेः। युक्तं न स्याद्वै
दिक एव स्यात्। अचोदितं च कर्मभेदात्। इत्यमेवेष्टिरुदाहरणं किमिपप्रतिग्रहस्य सा तत्र क्रतुरुत न क्रतुर्दातुरि
ति तत्र दर्शं च प्रक्रमस्यार्थवादस्य उपसंहारस्थविध्युद्देशस्य च विरोधे कस्य बलीयस्त्वमिति चिंत्यते। विध्युद्देशा
बलीयस्त्वो प्रतिग्रहीतुर्यावतोश्वान् प्रतिगृह्णीयात् तावतो वारुणान् निर्वपेदिति वचनात्। अर्थवादबलीयस्त्वे दातुः
प्रजापतिर्वरुणायाश्वमनयदिति प्रजापतिर्देवतासंकीर्तितो वरुणः प्रतिग्रहीता स स्वां देवतामार्छदिति सइ
ति समानविभक्तिनिर्दिष्टः प्रजापतिः स्वां देवतां पूर्ववाक्ये संप्रदाननिर्देशाद्वरुणं तेन प्रजापतिरश्वं दत्वा वरुणमप्र
हं प्राप इत्यर्थः स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तं निरवपत्ततो वै स वरुणपाशादमुच्यतेति स
र्वत्र प्रजापतिरेव दातानुपज्यते तेन परकृतिरूपेर्थवादे दातुरिष्टिर्वर्णितेत्यत्योपि दत्तेवं कुर्यादिति दातुरिष्टिर्गम्य
ते न देवं विरोधे किं बलीय इति तत्र विध्युद्देशस्य प्रधानत्वात् तदनुरोधेनार्थवादो व्याख्येयः दातुरपि तावद्दोषास्या

राम

५१

तू किं पुनः प्रातिगृह्णीतुरिति तस्मात्प्रतिगृहातुरिति प्राप्ते ब्रूमः। असंजातविरोधित्वादर्थवादो यथाश्रुतः। व्याख्येय

महिरूढत्वाद्विध्युद्देशस्य लक्षणा। १। प्रतिगृह्णीयादिति कर्तोच्यते अस्ति हि तस्यापि कर्तृत्वं तत्प्रयोजको हेतुश्चे

ति चकारात्, तस्मादुपक्रमवलाद्दातुरिष्टिः प्रपंचितं चैतद्बलीयस्त्वं श्रुतेर्जीताधिकारस्यादित्यत्र किमर्थं तर्ही

दमधिकरणं। उच्यते: ऋगादिशब्दा वेदे पिबहलं दृष्टप्रयोगाः गृह्णातिस्तु दातृव्यापारे न क्वचिद्दृष्टस्तेन नासो

त्यतरत्वेन व्याख्यातुं शक्यते इति विशेषशंकानिवृत्यर्थमिदमधिकरणं। अथवा भाष्यकारांतरैः सालिंगाद्दार्त्विजे

स्यादिति सूत्रानुसारात्प्रतिगृह्णीतुरिष्टिरश्रिता तन्निवृत्यर्थमनेनैव सूत्रेण दातुरिष्टिं प्रतिपादिपितुं भाष्यकारो धिक

रणांतरं च कारसूत्रद्वयं तु पूर्वाधिकरण एव व्याख्यं पंपक्षेप्यचोदितमिदं कर्मभेदे सति निर्णयाशाकेः। अतउभयत्रेसा

दिति चोद्यं तस्योत्तरं सालिंगाद्वैदिकत्वासामान्याद्दार्त्विज्ये ऋत्विकसंबंधिनि वैदिके दाने स्यादित्यर्थः॥ पानव्यापञ्चत

द्वत्॥ अनारभ्य श्रूयते सोमेंद्रं चरुं निर्वपेयः सोमं वमतीति तत्रापि तथैव संशयः। किं लौकिके सोमे रसायनाद्यर्थं पी

ते पुरुषार्थतयेयमिष्टिरुत वैदिके क्रत्वर्थतया अथवोभयत्रेति। तत्रा विशेषादुभयोर्दोषाद्वाल्लौकिके भवेत्। दोषोस्यत्रा

५२

स्तिवमनाध्यद्धिरिंद्रियवीर्ययोः।१। भवतिह्विवमनादिंद्रियवीर्यव्यद्धिः नवरुणग्रहवद्दत्यंताविधमानत्तेननत्सं
योगात् लौकिकेस्यात् वैदिकेतुपानमात्रस्यशास्त्रार्थत्वाद्वमनेपिनकश्चिद्दोषइतिनात्रप्रायश्चित्तविधिरर्थवा
न् एवंप्राप्तेब्रूमः।लोकेह्विवमनायैवपानाद्दोषोनविधेनोसंम्यक्जरणपर्यंतेवेदेपानंविपधीता।श।नता
वह्लोकेदोषोस्तिवमनार्थमेवपानात् अतोनतद्दृष्टान्तलौकिकएवेतिशक्यंवक्तुंवेदेतुसंम्यक्जरणस्यापे
क्षितत्वात्संम्यक्जरणपर्यंतयेमेवपानंशास्त्रार्थःनच्चवमनाद्धिपयनइत्यस्तिदोषःतेनदोषवत्त्वाद्वैवै
दिकेस्यात्।यद्यपिदोषश्रवयामर्थवादःतथापिलोकेदोषाभावात्प्रतीकारापेक्षानास्तीत्यनपेक्षितंप्राय
श्चितंवेदेतुक्रतुवैगुण्यात्समाधित्सोपजापतेअपेक्षितार्थनातत्रप्रायश्चित्तविधेर्भवेत्।१।अपेक्षिताविधि
र्ज्यायाननपेक्षितचोदनात् तिनक्रत्वंगमेवेष्टिःफलंचैवंनकल्प्यते।अश्वदानंतुवैदिकंशीघ्रमुपस्थित

मिति असत्यामपिप्रतीकारापेक्षायांनत्रैववारुणीष्टिःलौकिकंतुप्रतिषिद्धत्वात्प्रतीकारएवेष्टंसदप्यनुप
स्थितत्वान्नेष्टिगत्वानीतिविशेषः।नतसर्वत्राविशेषात्।येयंवैदिकेसोमवमनेक्रत्वंगमिष्टिवधातिरिमासाकि

राम
५२

यजमानवमनएवोतर्ह्विवमनेपीतिविचारः।तत्राविशेषतःसर्वेचमनेस्यात्तदुच्यते।सोमेंद्रंसचरुंकुर्याद्यःसोमंवमती
तिद्धि।यच्छूद्रादिष्टिवमनेगम्येतेतुल्यकर्तृके।२।इष्टौचक्रतुशेषत्वात्साम्येवर्हिनियुज्यते।कर्तृत्वेनेतिवमनमपिन
कर्तृकंततः।२।निमित्तम्रत्विग्वमनंननिमित्तमितिस्थितं।सर्वमदानंहविषस्तदर्थत्वात्।वमनस्यहविषयत्वा
त्।वमनस्यहविःशेषयत्वात्तत्प्रसंगाद्धविःशेषोत्तदृश्यमागनइत्यतःप्रश्नत्यापंचमपादसमाप्तेर्हविःशेषविष
याकथाप्रवर्तिष्यते।प्रथमंतावच्छेषसम्भावएवप्रतिपाद्यते।दर्शपूर्णमासयोःश्रूयतेआग्नेयोष्टाकपालोभवती
तितयोयस्तत्पातिअभिघारयतिद्विर्हविषोवद्यतिचतुरवत्तंजुहोतीतितत्रसंशयः।किंसकलस्यपुरोडाशस्याहवनीये
प्रदानमुतद्व्यवदानमात्रप्रदायान्यच्छेषयितव्यमितियद्याग्नेयश्चोसकलहोमेनमिविनानोपपद्येतततःसकलस्य
अथद्व्यवदानमात्रेणापितदुपपत्तिस्ततस्तावन्मात्रस्यहोमः।तत्राष्टाकपालत्वाद्रस्यावयववयवयरत्वेलक्षणा
प्रसंगात्कृत्स्नपुरोडाशावयव्येवानेनदेवतासंबंधीक्रियतेनचप्रदानमंतरेणदेवतासंबंधोपपत्तिरिति
सकलस्यप्रदानंयद्यपिद्व्यवदानस्यप्रत्यक्षश्रुतंहोमसाधनत्वंअष्टाकपालस्यत्वमेनुपंतथाप्यनिवार्यम

५२

तुमतं अन्यथा श्यावाकपालसंबंधस्यास्य तस्यानुपपत्तेः उत्पत्तिशिष्टत्वाच्च पुरोडाशस्य अवदानादुत्पन्नत्रिःशाढला
यस्त्वं अतो बलाद्यवदानवाक्यमुपाधयथसंख्याख्येयं यत्सकलं जुहोति तद्द्विरवदायेति न चाभ्यासमंतरेण सकलपु
रोडाशसाधनकोपागः शक्यते द्व्यवदानेन कर्तुमित्यर्थादभ्यस्यते सोमयागवत्। कथमिदानीं शेषकार्याणि स्विष्ट
कृदादीनि विद्यमानसन्निहितशेषाभावान्नद्द्विरंतरमाक्षेप्स्यंति यद्यप्यभवतु यच्छेषकार्यवशादवदानमात्रं
कृतान्यच्छेष्यते तत्र भवेत्तु सकलहोम इत्येतावान्पूर्वपक्षः कथं पुनरपर्ययस्तद्द्व्यस्यानुष्ठाने विशेषः पूर्वपक्ष
शेषशेषकार्याणामपि प्रयोजकजकत्वात् तदर्थावदानमांशोपि प्राधानवद्द्विरंतरोत्पादः सिद्धांते त्वप्र
योजकत्वाच्छेषोपद्ग इति प्रयोजनांतरमप्युपरिष्टाद्वक्ष्यामः। अत्रोच्यते। यागाप्रधानमेकेन द्व्यवदानेन
साधितः द्रव्यमस्तीति कृत्वा सोनावृत्तिं प्रतिपद्यते ॥१॥ आग्नेयत्वं च कृत्स्नस्य तावतैवोपपद्यते। अग्नयेद्व्य
वदानं यत्ततउद्धृत्य दीयते। अप्रधानस्तु तो हि यागो न पुरुषं यद्द्रव्यवशेनावर्त्तेत न च सोमयागवदभ्यासमं

राम

तरेणानुपपत्तिः उत्पत्तिशिष्टं हि पुरोडाशस्याग्नेयत्वं एतावतैवोपपन्नं पत्ततो गृहीतं द्व्यवदानं अग्नये दीयते

५२

अग्निर्दिवत्यस्य यागसाधनतात्वाग्नेयता साधनत्वं च प्रदेयप्रकृतितयाप्युपपन्नं व्रीहीणामिव पुरोडाशाद्व्या
रं सोमस्येव चरसघारं यद्वोरिव चत्हृदयादिद्वारं अतो घवदानद्वारं पुरोडाशस्य साधनत्वमिति न सर्वस्प्र
दानमिति भाष्याभिप्रायः वार्तिककारस्तु मन्यते संत्यप्रणाप्राप्त्युपपत्तमाग्नेयत्वं यदि प्रणाप्रां किंचित्प्रमा
णमभविष्यत् असति तु मप्रमाणे सा स्वदेवप्रदानं पुतं न चात्र प्रमाणमस्ति येन व्रीहिपशुसोमवत् प्र
णाडीमाश्रयामः चतुरवत्तं जुहोतीति वाक्यं प्रमाणमिति चेन्न भवेत्तत्प्रमाणं यदि होमानुवादेन वादेन चतु
रवत्तं साधनं विधीयेत न त्वेवमुत्पत्तिवाक्ये होमस्याप्राप्तत्वात् त्यागमात्रेण होमाभावेपि पर्यग्निकृतानारण्या
नुत्सृजतीतिवद्देवतासंबंधोपपत्तेः अतो नेयं वचनव्यक्तिर्यज्जुहोति तच्चतुरवत्तमिति किंतु पञ्चतुरवत्तमि
स्मृपस्तरणादिवाक्यप्राप्तं चतुरवत्तं द्वितीययासंकार्यत्वं नोद्दिश्यते तत्संस्कारी होमो विधीयते होमश्च त्याग
पूर्वः प्रक्षेपः तत्र त्यागस्योत्पत्तिवाक्यप्रमतत्वाद प्राप्तप्रक्षेपांशः संस्कारो विधीयते अतो नानेनोत्पत्तिवाक्यवि
हितस्य कर्मणः साधनविधानं येन पुरोडाशस्य तत्प्रकृतित्वं स्यात् कर्मांतरमिदं अवघातादिवत् संस्कारस

५३

53

रूपं विधीयते यागस्य तु साधनांतराभावात्पुरोडाशं एव साक्षात्साधनमिति सर्वं प्रदानं। न नाचारादेव होमः प्राप्तः न
आनाचारस्य स्वतः प्रामाण्याभावात् श्रुतिकल्पनस्य प्रत्यक्षश्रुतिसद्भावेनुपपत्तेः यदि चाचारप्रमाणको हो
मः स्यात्ततस्तस्य प्रकृतिविकृतिसाधारणत्वात् विकृतिष्वप्यपदेशिक एव होम इति प्रसंगो रत्वादाहवनी
याद्यः पवमानेष्ट्यादिषु उपदेशादेव प्राप्येताग्नयश्च स्वकालत्वादिति न्यायात्तत्रता सामग्र्यः प्रकृतितः प्र
याजवदिति सूत्रकारव्यवहारेणोपपद्येत तस्माच्चतुरवत्तं जुहोतीति होमविधिः यागस्तु सकलपुरोडात्राद्र
व्यक इति समंजसं अधिकरणं तु होमविषयं व्योरस्तापं प्राप्नोपाह्वविषां होमदर्शनादग्निमुखा वै देवा इति
चार्थवादात्साकलस्य होमं मन्यते चतुरवत्तं जुहोतीति वचनात्तावत एव होमः सकलस्य तु देवतासंबंधस्यागमा
त्रादेवोपपन्नः एवं च शेषात्स्विष्टकृतमित्यादि समंजसं भावितं न त्वग्न्यादिभ्योऽवत्तं कथमिव पुनः स्विष्टकृते दी
यते त्यक्तस्य हि पुनः स्वीकारे शिष्टाचारविरोधः स्यात्। प्रत्यक्षश्रुत्याचारं बाधितानावत्तमात्रं पुनः स्वीक्रियत इ
त्यदोषः। अयोजकत्वादेकस्यान्त क्रियेरन्न शेषस्य गुणभूतत्वात्। सति शेषे शेषकार्याणि स्विष्टकृदिडादीनि कि

राम

५३

मेकस्माद्बहुविधः कार्याणि उत सर्वेभ्य इति विचारः तत्र शेषात्स्विष्टकृत इति शास्त्रार्थस्य कृतत्वादेकावयवाणि न
सर्वेभ्य इति प्राप्ते उच्यते यद्विशेषगुणकानि प्रधानकर्माणि एकानि तानि ततः स्यादेवं शेषस्य त्वाकीर्णकास्यापेक्षि
त प्रतिपत्तेः प्रतिपत्तिनियमो यं विधीयते स यस्यैव न क्रियते तस्यैव प्रतिपत्तिनियमलोपाद्वैगुण्यं स्यात् न तस्मात्स
र्वेभ्यः ।प्रतिपत्तित्वं चैषां चतुर्थे वक्ष्यते ।उत्पत्तौ येन संयुक्तं तदर्थं श्रुतिहेतुत्वात्तस्याधीनत्वामने शेषत्वात्प्रति
पत्तिः स्यादिति ।तेनैव गतार्थत्वान्नेदमधिकरणान्तरं प्रयोजनसूत्राणि त्वेतानि पूर्वाधिकरणस्य यदा शेष
कार्यवत्त्वात्सर्वेषु पक्षेष्वपि सर्वप्रदानं किं तदा चिन्तायाः प्रयोजनं तत्राह पूर्वपक्षेऽपि सर्वप्रदाने प्राप्ते स्विष्टकृदा
दिवशेन तदा शेषः स्याप्यते प्रधानकर्म च न तदा स्विष्टकृदादि भवति तच्चैकस्मादेव सिध्यतीत्येकस्मादेशेवत्त्वं
स्यापत्तिर्पित्वा एकस्मात्कार्याणि तदा किमनियमः यतः उत स्विष्टकृन्मुख्यादिति ।विशेषाभावादनियम इ
ति प्राप्ते ब्रूमः समुख्यस्य प्राप्तनिमित्तत्वाच्छेषः स्थाप्यते तस्मिंश्च तस्यापि तेन तत एवोपनते एवोपनतेः शेषकार्या
णानि मित्तविघातान्नेतरेभ्यः शेषस्थापनं तस्मान्मुख्यादेव कार्याणि ॥११॥ भक्षाश्रवणाद्दानशब्दः परि

५८

54

क्रये· आग्नेयं चतुर्धा कृत्वेदं ब्रह्मण इत्यादिव्यादेशेनर्त्विग्भ्यः समर्प्यते तत्र संशयः किमिदं समर्पणमृत्विजां
यथोक्तं विनियोगार्थं परिक्रया यउत द्रव्यप्रतिपत्त्यर्थं भक्षणायेति भक्षस्याश्रवणात्तावता दृष्टार्थं नावगम्यते·
कियत्यप्यानतिस्तावद्भवतीति तदर्थता· न त्वपूर्वकृते भक्षेनादृष्टमध्यवसातुं शक्यं· कर्मकरेभ्यश्च दीयते दी
यमानं च ता वक्रि पतीमप्यानतिं करोतीति सोमचमसवत्क्रयार्थता· एवं· स्वामी हि द्रव्यदानेन परिक्रीणीत न
त्विजः स्वामित्वं कस्यचिद्दत्तं देवतायै हविर्यत· सकलस्य हि हविषो देवतायै प्रक्लृप्तत्वादनीशानो यजमानः तुल्यः स
कृत्विग्भिः कथं परिक्रीणीत· तस्मान्न परिक्रयः शेषस्य तु प्रतिपत्त्यपेक्षस्य सत्तायोग्यतया च एडाशस्य भक्षण
मेव प्रतिपत्तिरवगतेति कर्तृविशेषमात्रापेक्षायां ब्रह्मादयो निरूप्यन्ते· तत्रियमस्यापि दृष्टमेव प्रयोजनं तेषां
करिष्यमाणकर्मप्रयोगकौशलं· भक्षणाद्धि सामर्थ्यं भवतीति भक्षणार्थता ।। २२ ।। इति शास्त्रदीपिकायां तृती
याध्यायस्य चतुर्थः पादः ।। आज्याच्च सर्वसंयोगात्· शेषकार्याणि किं दर्शपूर्णमासानुयाज इज्यात् कृतव्यान्युतनेति एम
संशयः तत्रापि शेषात्कर्तव्यानीति प्राप्ते उच्यते· कृतार्थस्य प्रतिपत्त्यपेक्षस्य स्थितस्य शेषस्य प्रतिपत्त्यर्थो ५८

निश्शेषकार्याणि॰ न चाज्यमेवंविधमस्ति। यत्तावद्ध्रुवायामवस्थुपांशुयाजार्थं गृहीतेवशिष्टमाज्यं न तत्स्वा
ह्वास्तुपस्तरणाद्युपयोगीत्यकृतार्थेन प्रतिपत्त्यर्हं॰ सर्वान्ते च तेन निःशेषेण समिष्टयजुर्होमः क्रियत इति न
न ततः शेषकार्याणि॰ यज्जुहूं चतुर्गृहीतं तत्त्वशेषं हुतमिति शेषाभावान्नाज्याच्छेषकार्याणि॥ साकंप्रस्था
यीस्विष्टकृदिडं च तद्वत्॰ साकंप्रस्थायीये स्रुचपत्ते सह कुंभीभिरभिक्रामेमिदिति॰ तत्र किं शेषकार्याणि कर्तव्यान्यु
त नेति॰ तदर्थं च किं कुंभीषु शेषो विधत उत नेति॰ तत्राभिक्रमणमात्रं कुंभीभिर्न होमः। स च अभिक्रम्याहवनीयमव
दृश्ये वजुहूक्त यथाप्रकृति कर्तव्य इति शेषसद्भावात्कर्तव्यं स्विष्टकृदादीनि प्राप्ते उच्यते नेदमप्राकृतकर्म्येमपूर्वम
भिक्रमणं कुंभीभिर्विधीयते किंतु परे च प्राकृतं होमार्थं जुहूभिक्रमणं तत्र वजुह्वमपहाय कुंभ्यो निवेशयमाना
होमार्थाविज्ञायंते न त्वन्यथा होमार्थाभिक्रमणसंबंधो युज्यते॰ तदनेन प्रकारेण कुंभीभिर्होमो विधीयते तद्धि
धौत्याभिक्रमणं प्राप्तमेवानुवदतीति तस्मादत्रापि निःशेषाभावान्न शेषकार्याणि॥ सौत्रामण्यां च ग्रहेषु॰ सौत्रामरं पा
पयोग्रहा। सुराग्रहाश्च॥ तत्र वक्ष्यते यथा गृहीतान् ग्रहानृत्विज उपाददते॰ उत्तरेणोपयोग्रहा जुह्वति दक्षिणे

यो सुराग्नावाहानिति। न त्वापि पूर्वेद्युर्देवसंशय पूर्वो तस्य रपाक्षाः सोमगन्दहतुल्यकृतित्वात्तत्र च शेषसद्भावादिहापि

५५ स्यादित्येतावती मात्रा कांच्यावर्तेपितुमति हेत्वाः द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रियेरन्। सर्वेष्वस्थायां षड्कर्माणां

द्रापरस्थं न एप निर्वपन्ती द्रापवादे न्नापत्ये वमादीनि तेषां षड्हृतं वीपि क्रमे णायथादेवतं निरूप्य प्रकृतिवत्स

हावघतये शेषकृत्वा विभागे प्राप्ते नमकृत्वाव चनात्सर्वैरेकं पुरोडाशं कृत्वा ततः समं तं पर्येवदायर्यवदा

यप्रधानानि क्रियन्ते। तत्र किं प्रतिकर्मभेदे न स्विष्टकृदिडमवदेयमुत सकृदिति संशयः तत्र कर्मबहुत्वे

न प्रतिकर्मोव सामिभिः चोदकैः शेषकर्मापि प्रतिकर्म प्रदिश्यते तस्मात्प्रतिकर्मोव देयं तथा च प्रधानभेदे

एकस्मिन्नपि शेषे शेषकार्यावृत्तौ सिद्धवद्धेतुं दर्शयति। द्विरे द्वाप्यवस्य भक्षयति द्विर्ह्येतस्य वषट्कृतं भवतीति

तद्वदिहापीति प्राप्ते ब्रूमः सर्वसाधारणः शेषस्तस्मात्सकृदावदाने नैव सर्वेषां कृतं स्यादविशेषात्

ननूक्तमेकस्य पुनः सागाययोगात्सकलः पुरोडाशः सर्वार्थः किं त्वेकैकावयव एकैकस्य यागस्य साधनं। तथैना एम

वयवेनयो यागः क्रियते तदुत्तरार्द्धादवदीयमानेन तस्य शेषादनं भवतीति भेद एवन्यायः नैतदेवं। अवयवाना ५९

मेवविशेषाग्रहणात्तनस्येन्द्रायवोयमवयवोस्यायमस्येतिविशेषेप्रमाणाभावात्। होमहेतोश्चाएववचनाद्यवस्थि
तानापागदेशाः तेनयागावस्थायामेवंसंकल्पयितव्यं। योस्मिन्पुरोडाशोनिर्वापदशायामिंद्रायरथंतरएपदातं
प्रक्रांतोत्रासंततस्मैददामीति। एवंसर्वेषूक्तेषुशेषस्यसाधारणत्वादगृह्यमाणविशेषंशेषकार्यंतंत्रेण
सकृत्कर्तव्यं। ऐंद्रवायवेतुवचनात्प्रतिकर्मभक्षोनप्रधानभेदात्। हेतु। निर्देशात्तर्थवादमात्रं। ऐंद्रवायवेतु
वचनात्प्रतिकर्मभक्षः स्यात्। ऐंद्रवायवेतुकिंसकृद्भक्षणमुतद्विरिति। पूर्ववत्सकृदितिप्राप्तेवचनाद्विरितिसिद्धांतः
सतिवचनेपूर्वंपश्चासंभवात्पूर्वाधिकरणएवोपवर्णितापरिहारार्थंसूत्रंनाधिकरणांतरं।५। सोमेर्वचनविघते।
सोमेवहद्वोग्नहाश्चवमसोश्वयुरुषाश्च। तत्रसंशयः नकश्चित्कस्यचिद्भक्षणं अतः सर्वत्रसर्वेषामविशेषेणभक्ष
ःउतयस्ययत्रप्रत्यक्षवचनंतस्यतत्रभक्षणं। अथवासमाख्यावषट्कारहोमाभिषवप्रत्यक्षवचनैर्भक्ष इति। वा
र्तिकेतुसर्वत्रसर्वेषांभक्षइतिपक्षमतिमंदसात्वात् अनुपान्यस्यत्रयःपक्षाइत्युक्तं। तद्विद्दमतः। प्रभृतिहोमाभि
षवाभ्यांचेत्येवमंतमेकमधिकरणं। तत्रभक्षणंनास्तिसोमस्यनिःशेषंहयुतेयतः। शेषेसत्यपिनैवात्रभक्षणंविध्यभाव

५६
56

तः सोमे ह्रियङ्गृहात्तस्याप्यायन्तियचमसम्. जुहोतीतिवचनात् सौत्रामणीसाकंप्रस्थायीयवच्छेष एव नास्ति कुतो भ
क्षणं. अल्पं जुहोतीतिवचनमल्पतामेतत्सोमपात्राणामनुवादमात्रमिति मन्यते. यस्सस्वग्राविडुनिपातमात्रेणत्रा
स्त्रार्थस्यकृतत्वान्नेशेषहोम इत्याह तस्य सौत्रामण्यादावपि तथैव स्यात्तु पांशुयाजे च जौहवस्य शेषः स्यात्. अ
यशेषकार्येव शान्तिस्ये ततस्तेषामभिप्रत्ययोजकत्वात् शेषनाशादोषापहारादावपि स्विष्टकृदादावपिह वि
रंतरागमः स्यात्. तस्माद्दशेषत्वाद्भक्षणं. यद्यपि चाल्पं जुहोतीतिवचनस्यानन्यथात्वाच्छेषः स्यात्तथापि न भ
क्षो वचभावात्. पुरस्तादैद्रवायवं भक्षयन्ति वषट्कर्तुः प्रथमभक्षो हविर्धानेश्वावभिरभिषुत्याहवनीयेहुत्वा प्रत्यंचः
परेत्य सदसि भक्षाभक्षयन्तीत्यादौ सर्वत्र श्रुणां तस्य श्रवणात् तयोर्विधिर्न भक्षं विधत्ते. अथो न तस्य हारियोजनस्य सर्वैर
वलिप्सन्त इति लिप्सामात्रं श्रुतं भक्षः तस्मान्नास्ति भक्ष इति प्रथमः पक्षः। शेषत्वादस्त्वेवल्पहोमविधानादस्त्येव. तस्य
चासति भक्षे विशेषविधानं पुरस्तादैन्द्रवायवं भक्षयतीत्यनुपपद्यमानं भक्षं गमयति: तच्चलिङ्गं स्थाली पुलाकवदिति वि
शेषेण भक्षं संगमयतीति सर्वत्र सर्वेषां भक्ष इति द्वितीयः पक्षः स्यादेतद्यदि विशेषविधिरयं. असत्यां तश्च भक्षणप्रा

राम
५६

त्तोविशेषविधिर्नेष्यत इति अयमेव विशिष्टभक्षविधिः तस्मात्पत्नैंद्रवायववाहोपस्याध्वर्योरेः भक्षोपदेशात्तस्य
तत्र भक्षो नातिप्रसज्यत इति तृतीयःपक्षः सिद्धांतस्तु सत्यमेन पक्षयोपदेशं भक्ष इति पुरस्तादैंद्रवायववस्ये
त्येवमादिभिस्तु भक्षोपदेशेनयेषु तेष्वेव भक्ष इति नमृष्यामसहे कारणांतरदेव भक्षप्राप्तेः पुरस्तादित्यादेस्तु विशे
षमात्रपरत्वात् तच्च कारणांतरमन्यत्राप्यस्ति किं पुनः कारणांतरं समाख्यावषट्कारहोमाभिषवा यथायथं
प्रापकाः हारियोजनेतु वचनं तत्र चमसेषु तावत्समाख्यया चमसिनां भक्षः होतृचमसादिसमाख्या वेदेषे
तु होतुश्चमस इति मंत्रे पठिता सोमचमस इति लौकिकी समाख्या चमसत्येषोऽदनार्थस्य चमेरैणादिको
धिकरणसाधनः प्रत्ययः तस्माद्त्र होत्रादिभिश्चमितव्यसोम इति सिद्धश्चमसेषु चमसिनां भक्षः उन्नातृचम
समेकस्यभक्षतिसंयोगात् संप्रति वषट्कारनिमित्तं भक्षमनुत्ताधिकरणमसमाप्यैवांतरा समाख्याभक्षप्र
संगमेवानुसरति तत्रैव मंत्रे प्रोद्गातॄणां चमस इति श्रूयते तत्रोद्गातृचमसं उद्गातार एको भक्षयेत् प्रातिपदिका
र्थविरोधिनो बहुत्वस्य पाशवदन्याय्यत्वनादिति प्रथमः कल्पः सर्केपाशवद्बहुत्वस्य प्रकरणे संतासंभवादिह तुल

५७

क्षणयार्थेपरत्वेसंभवतिनक्वचनस्याततस्तंतबाधनंयुक्तंतस्मादुद्गातशब्दःपुरुषांतरंलक्षयातीति॰तत्रचाविशेषात्प्र
करणगतसर्वपुरुषलक्षणात्सर्वेषांभक्षइतिद्वितीयः।अकृत्यर्थेसंभवतिनकस्यचिल्लक्षणापुक्तागानकारिषुत्र
त्रिषुअवयवयोगेनवर्तमानंप्रातिपदिकंबहुवचनंचद्वयमपिअकृत्यर्थेसंभवति।तस्माद्यसुब्रह्मण्यानांत्रयाणां
गानकारिणांछंदोगानांभक्षइतितृतीयःपक्षः।नावयवव्युत्पत्त्यापित्रिषुतद्वृत्तिःसंभवति॰नाहिगानमात्रसमुद्गा
नसाम्नोहिद्वितीयाभाक्तिरूत्पूर्वस्यगापतेरभिधेयातांचोद्गातैवैकोगायतीतिबहुवचनानुपपत्तिःतस्मा
छत्रन्यायेनैवव्याख्या॰साचनसर्वेषांकिंतोद्गातृप्रवचनसंबंधावांतरकासामान्यात्सस्कब्रह्मण्यानां चतुर्णामपि
छंदोगानामतश्चत्वारोपिभक्षयेयुःनैवं॰सत्यंलक्षणाःसातुपक्षाथावांतरसामान्याच्चतुर्णामेवनसर्वेषामे
वैषामेवंएकस्तोत्रसंबंधःसदसिचसंनिधानंभक्षवेलायांचव्याप्तृतिरित्येतान्यवांतरसामान्यानिस्तोत्रका
रिणांसंतीतितेषामेवत्रयाणांलक्षणान्याय्या॰किंचप्रेतुहोतश्चमसइतियत्रभक्षपितारःस्थिताःतत्र
नयनंभक्षार्थंप्रेष्यातेसदसिचनयनं।अन्तोयेसदसिस्थितास्तानसर्वान्प्रतिगम्यते॰नचसुब्रह्मण्यस्तत्रस्थि

राम

५७

तः न च बहुवचनबलात् तस्य सदसि स्थितिरांशे लुंठ्यते। स्थिते षेव स्तोत्रकारिषु तदुपपत्तेः अतो यत्केनचिदुपन्या
दुक्तं अपसुब्रह्मण्यवादिनो पमान्याय्यवादिन इति तद्देवान्यापपं अपनीनेचेति कत्वाप्राशे रुन्मत्तभाषितवदुपेक्षित
यं। मावस्तुतो भाश्यो न दिघतेः नाम्नानात् इदमपरं भक्षस्य कारणं। यथा च मसमेन्यां स्तुमसांश्चमसिनो भक्षये
तीत्युक्तार्थे तस्य हारियोजनस्य सर्वदेवलिप्संतदृत्युभिया नाङ्गक्षणमेवलिप्सतिना विधीयते ते नैव तद् हूच नं हा
रियोजने भक्षस्य कारणनिमित्तं स्थिवते विंत्यते। किंच मसिनामेवात्र भक्षणं उत सर्वेषामृत्विजामिति। यदा च
मसिनां तदा ग्रावस्तुतः कारणांतराभावाद् भक्षणं। सर्वविषयत्वे तु तस्यापि भक्ष इति। तत्र संनिधेः सर्वत्रा
द्गोपं चमसिषेव वर्तेते ते। ते न तेषामयं भक्षो ग्रावस्तुत्से कन्न क्षपेत् उच्यते सर्वशब्दोयं कृत्स्नार्थवचनोप
नतः तेन सर्वेषु वर्तेत न संकोचोस्य युज्यते। सर्वशब्दोयं समस्तवचनोपि यरमसर्वेण व्यवहारप्रयोगात् केन
चित् वच्छेदं सहते। स चावच्छेद्यं प्रकृतयागगतत्वेनावच्छेत्तव्यः चमसिनामपि प्रकृतगामिनामेव ग्रहणात् ते
न चेह द्विरुपेषीतस्तं न्मात्रादेव सिद्धेः न मूयन स्तु मसिशब्देन यथा चमसभंवं धकृतार्थेन श्रुतेः संकोचो युज्यते।

द्वा वषट्कर्तापि भक्षः। वषट्कारश्च भक्षयेत्. इदमपरं कारणं. वषट्कर्तुः प्रथमभक्ष इति वचनात् समाख्याप्राप्तं भ
क्षानुवादेन प्राथम्यमात्रं विधीयते न भक्षणमिति चेत्. न. वषट्कर्तुर्विशिष्टभक्षानुवादेन प्राथम्यविधौ वि
शिष्टानुवाददोषात्. किंच प्रथमभक्ष इति समस्तमिदमेकं पदं तस्य चैकप्रसरत्वान्नैकांशेन भक्षणमुद्दिश्यांशे
ण प्राथम्यं विधीयत इति वक्तव्यं न हि द्वयं संभवति तस्माद्वषट्कर्तुर्भक्षणं प्राथम्यविशिष्टं विधीयत इति वषट्
कारोपि निमित्तं. होमाभिषवाभ्यां च. अपरमपि कारणं होमाभिषवौ. एवं स्वाहा हविर्धाने ग्रावभिरभिषुत्याहवनी
ये हुत्वा प्रत्यंचः परेत्य सदसि भक्षान्भक्षयंतीति। अत्र हि तद्धविर्धाने अभिषवः स च ग्रावभिः प्राग्भावी च होमात्.
होमस्त्वाहवनीये. ततश्च प्रत्यगागमनमिति सर्वमिदं वचनात् एतदर्थाच्च प्राप्तं न विधेयं अभिषवहोमसमानकर्तृ
कं भक्षणमेव विधीयत इति तयोरपि कारणत्वं. प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषः. इदानीं पूर्वाधिकरणोक्तानां
भक्षकारणानां समवाये किं बाधः अथ समुच्चय इति. चमसेषु हि चमसिनां भक्षणं समाख्यया वषट्कर्तुर्वषट्का
रेण होमाभिषवाभ्यामध्वर्योः प्राप्यते तत्र समाख्यायास्स्वचमसमात्रविषयत्वाद्वषट्कारादेर्महद्विषयेपि सावकाशा

त्वान्प्रतिपत्तेरेवैकेनैव भक्षणेन सिद्धेः चमसिनामेव चमसेषु भक्ष इति पूर्वः पक्षः वाचनिकयोर्होमाभिषवभ
क्षयोः समाख्यया बाधायोगात्तस्याश्च निरवकाशत्वेन ताभ्यां बाधासंभवात् अत्र यद्यप्यध्वर्योर्भक्षः प्रति
पत्तिसंभवेऽन्यतमस्यापि बाधो न युक्त इति समुच्चय एवेति सिद्धान्तः एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् सि
द्धे नैकेषां भक्षणे क्रमाकांक्ष्यते किमध्वर्युः पूर्वं भक्षयेदुत वषट्कर्तेति तत्राध्वर्युर्हस्ते पात्रस्यावस्थानात्तत्ताव
द्भक्षयेत् ततो वषट्कर्ता चमसिनस्त्वत्र वषट्कर्तुः प्रथमभक्ष इति भक्षणपरं न प्राथम्यमपि विधत्ते वाक्यभेदा
त् अथवाध्वर्योः प्राथम्यस्य न्यायतः सिद्धत्वान्न तद्बाधनं युक्तं वषट्कर्तृत्वे चमसिना नान्तरगतः क्रम आकांक्षित
त इति द्विषयमिदं वचनं वषट्कर्तुश्चमसिभ्यः प्रथमभक्ष इति नाध्वर्योः व्यपेक्षा तस्मादध्वर्योः प्रथमभक्ष इति प्रा
मे ब्रूमः वचनस्याविशेषेण प्रवृत्तेः न न्यायमात्रेण संकोचायोगात् द्विरशनविधानाच्च वाक्यभेदाभावात् होतेव नः
प्रथमः पाहीति मंत्रवर्णात् कारणभूतस्य वषट्कारस्य च प्राशस्त्यात्तन्निमित्तकभक्षणं प्रशस्तं कर्तव्यं वचनात्तु वचना
भावेऽपि कारणप्राथम्यादेव वषट्कर्तुः प्रथमं भक्षणं भवतीति प्रतिपादयितुमिदमधिकरणं वचनोपन्यासस्तूक्त

५९

59

त्वाच्चिंतोद्घाटनार्थमित्याहुः तेषां स्वव्यवहारविरोधः तार्तीयः कक्रमोऽभिप्रियो विधेयत्वाद्विलक्षणं व्यवहारं वेत्ति। अत एवासौ
तृतीये चिंत्यत इत्याहुः अन्ये त्वाधिकरणे क्रमश्चिंता। वषट्कार एव च भक्ष इत्यत्र वषट्कारोऽपि भक्षनिमित्तमित्युक्तं
न क्रमः सन्निहितैव चिंत्यते। स चेद्वचनमनादृत्य न्यायादेव चिंत्यते साप्यनभिधेयः पांचमिकवद्विधेयत्वस्यास्तीति
सिद्धांतहानिः पंचमोऽसौ चिंत्यः स्यात्। प्रसंगादिह चिंत्यते युष्माकमिवेति चेत् तर्हि तथैव ब्रूहि विधेयत्वादसौ तृती
येऽचिंत्यत इति पांचमिकाद्विशेषाभिधानं प्रलापः किं च यद्वि वचनादिति सूत्रं कृत्वाऽचिंतोद्घाटनार्थं तर्हि तदधि
करणं समाप्य कर्तव्यं इदं तु कारणानुपूर्व्यादिति सूत्रात्प्रागेव कृतमिति न कृत्वाचिंतोद्घाटनं युज्यते। यदि च
न्यायादेव प्राथम्यं लभ्यते ततोऽवचनमेवेदं न्यायानुवादमात्रत्वात् तत्र वचनादिति सूत्रानुपपत्तिः न च रक्षा
मिदं न्यायाद्वक्तुं यदा वषट्कारः कृतस्तदा भक्षणं कर्तव्यं। अहुतस्य भक्षणासंभवाद्धोमे तु कृते नान्निमित्त
कमपि भक्षणमुपस्थितमेवेति न कश्चिद्विशेषः प्रत्युत वषट्कारनिमित्तत्वं अस्पष्टं इति तद्वदेव प्रथमं कृत्वाप
रत्वादन्यत्कर्तव्यं वक्ष्यति हि सहालंभे सवनीयमुपाकृत्वापरत्वादग्नीषोमीयोपाकरणमिति तस्माद्वचनादेव प्रा

राम

५९

थम्यं वषट्कर्तुः अभ्युन्नयमानं तु शाकाणारनुपूर्व्यं· वचनात्समनुज्ञातभक्षणं नानुपहूतेन सोमः पातव्य इत्यत्रोपहू
तशब्देनानुज्ञानमुच्यत इति रक्षोऽपि तु मुत्तरं चिंतार्थं चेनतस्त्रं· तदुपहूत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिंगात्· अनुज्ञा
प्यभक्षयितव्यं वचनादिति स्थितं· तत्र लौकिकेन शब्देन मंत्रेण वेति· उपहूत उपह्वयस्वेति लिंगवन्मंत्राम्नानात्तेने
व कर्तव्यमिति· इदमपि प्राप्तिसूत्रमेव· तत्रार्थोऽप्रतिवचनं· उपहूत उपह्वयस्वेति मंत्रः स किं समस्त एवानुज्ञाना
नुज्ञापनयोः अन्यतरत्र प्रयोक्तव्य इतरत्र लौकिकः शब्दः उतोभयत्रापि समस्तः किं वा विभज्य यथायथमिति
·तत्रानुज्ञापनपूर्वकत्वादनुज्ञाया मंत्राम्नायोऽवचनाद्धि परीतत्वान्न विभज्य विनियोगः तस्मात्समस्तोऽयमन्यतरत्रो
भयत्रैवेति प्राप्ते ब्रूमः लिंगेन वाक्यं बाधित्वा विभाग एव मंत्रयोः तत्रापि पाठक्रमम् अर्थक्रमेण बाधित्वा पश्चात्पठितो
ऽप्युपह्वयस्वेति पूर्वभाविन्यनुज्ञापने प्रयोज्यः पूर्वपठितोऽप्युपहूतशब्दः पश्चात्तन्यामनुज्ञायां· तदेकपात्राणां सम
वायात्· तदुपाह्वानं किं सर्वेषां पुरुषाणामुतैकपात्राणामेवेति· अविशेषात्सर्वेषामिति प्राप्ते ब्रूमः दृष्टार्थमनुज्ञा
पनं व्यलोकं भागाधिकां चमर्षयितुं॥ तच्चैकपात्राणामेवेति तेषामेवानुज्ञापनं· यान्नायापनयेनापनीभोतोभक्षः

६०

60

प्रवरवत्त्होतृप्रववचनाम्नानायाजाः समाख्ययाहोतुः प्राप्तास्तत्रकश्चिद्ब्रूते तुरायणीययजमानस्यविधीते· तस्यामय
मानायांकिंवषट्कारभक्षावपनीयेते उत नौ होतर्येवावतिष्ठेते याज्यामात्रं तु अपनीयत इति संशयः तत्रयज
मानस्ययाज्येतियाज्यापनयचोदना· वषट्कारस्तुयाजानांतोभिन्नत्वान्नापनीयते· याज्याया अधिवषट्क
रोतीतियाज्यातोवषट्कारस्यभिन्नत्वान्नतदपनयेनापनयः यद्यपिस्वयंवानिषद्ययजतीतियष्टृत्वंयज
मानस्योक्तंतदपियाज्यामात्रप्रयोगाद्देवोपपन्नं अतस्तेनप्रयुक्तायायाज्यायाअधिहोतैववषट्कुर्यात्तन्नि
मित्तश्चभक्षस्तस्यैवेति प्राप्ते ब्रूमः · यष्टृत्वंयजमानस्यप्रत्यक्षवचनाच्छ्रुतं। परिपूर्णंचयष्टृत्वंवषट्कारेयाजा
यते· याज्यामात्रप्रयोगेनन्यूनंतच्चनयुज्यते· अनवानंचयष्टृत्वंयाज्यामात्रंब्रुवन्नसौ। अवान्यायजमानो
नोतोवषट्कुर्यात्सनेतरः भक्षोऽपियजमानस्यवषट्कारनिमित्तकः। फलचमसोनैमित्तिकोभक्षविकारः
श्रुतिसंयोगात्· यदिराजन्यंवैश्यंवायाजयेत्सयदिसोमंविभक्षयिषेत्न्यग्रोधस्तिभिनीराहृत्यताः संपि
ष्यदधन्युन्मृज्यतमस्मैभक्षंप्रयच्छेत्न्नसोमनमितिराजन्यवैश्यनिमित्तेनसोमविकारः फलचमसः श्रुत

राम

६०

सकिंभक्षमात्रे सोमं विकुर्यादुतेज्यायामिति संशयः तत्र विभक्तपिषेदित्यपक्रमात् स्वर्गं प्रयच्छेदिति चोपसं
हारादत्रैव विकारो नेज्यायाम श्रवणादेवं प्राप्ते ब्रूमः यागार्थं द्रव्यं संस्काद्रूपभक्षणसंगतेः स्तिभीनीचम
सोयागे द्रव्यमित्यवधार्यते यदि सोमं विभक्तपिषेदिति सोमभक्षमनुसंकीर्त्य तत्र फलचमसो निक्षि
प्यते प्रकरणाच्च सोमभक्षो नश्यक्षांतरं स चायागद्रव्यसंस्कारत्वेन निज्ञातिस्तत्संबंधित्वेन च श्रूयमाणः
फलचमसोन्यथा तत्संबंधायोगाद्यजमानचमसयागाभ्याससाधनत्वं प्रतिपद्यते तदेवं भक्षसंबंधक
थनव्याजेन तद्द्वारावगतयागसंबंधित्वेन विधीयते तद्विधौ च भक्ष्यक्षासंबंधः प्रादातव्वानूद्येत तस्माद्दिज्या
विकारत्वं। एतेनाभिषवयुतकयूतीकानां यागसाधनत्वं व्याख्यातं।। अनुप्रसर्पिषु सामान्यात्।। एजसूये द्रचोपे
यः सोमविकारः तत्र एतोधिकारः ज्योतिष्टोमाद्बात तत्र दश चमसाः प्राप्ताः तेषु यजमानचमसस्य एज्जो भक्ष
तं प्राप्तं तत्रेदं श्रूयते दश दशैकैकं चमसमनुप्रसर्पेयुः शतं ब्राह्मणाः सोमान् भक्षयंतीति तत्र संशयः किंय
जमानचमसं यराजन्याद् ब्राह्मणा भक्षयेयुः उत ब्राह्मणा इति तदर्थं च किं दशदशेति विधिः शतं ब्राह्मणा इत्यनुवा

६१

61

वादः उक्तायमपि विधिरिति। तत्रानुप्रसर्पेयुरिति विधिश्च वपात्वाति च संमदृग्राः संख्या विधीयते। तथा च संख्यामा
त्रं प्राकृतं निवर्तते जातिस्तु प्रकृतैवावतिष्ठते तत्रारुणैकहायनीन्यायेन जातिसंख्ययोर्मिथो नियमे सति ब्रा
ह्मणचमसे ऋत्विग्राजन्यादयो भवंतीति शतं ब्राह्मणा म्भक्षयंतीति वर्तमानापदेशात्म चयशिष्टत्वात् सानुवादः अ
स्माच्च ब्राह्मणा ब्राह्मणेष्वेव ब्राह्मणशब्दः अनुवादत्वाच्चैव लक्षणापि न दुष्यति। तस्माद्यजमानचमसं राजानोऽभ
भक्षयेयुरिति। उच्यते विधिरेवायमर्थवत्त्वाच्छ्रुतेस्तथा। अन्यथा वचनं व्यर्थं लक्षणा च प्रसज्यते। न हि कृतत्वा
दुवादस्य किंचिदस्ति प्रयोजनं संभवत्यां श्रुतौ न च लक्षणाप्युपयुज्यते। तस्माच्छ्रुतानुवादेन ब्राह्मण्यमिह
चोद्यते। तत्र च न्यायतः प्राप्ता राजा जातिर्निवर्तते। स्यात्सं चमलकारेण विधिश्च समिदादिवत्। ब्राह्मणानां
मतो भक्षो राजन्यचमसे स्थितः। इति श्रीशास्त्रदीपिकायां तृतीयस्याध्यायस्य पंचमः पादः। सर्वार्थमप्रकर
णात्। अनारभ्य विचारप्रस्तावागतां शेषविषयं विचारं समाप्येदानीं तमेवानारभ्यवादमनुसंधत्ते यस्य खादि
रः स्रुवो भवति यस्य पर्णमयी जुहूर्भवतीत्यनारभ्य जुह्वाद्युद्देशेन विधीयमानाः पर्णतादयो जुह्वादीमानाक्र

राम

६१

त्वव्यभिचारात तद्वारेणकृत्स्नार्थत्वे निरस्ती ते चिंत्यते· किं प्रकृतिविकृतिसाधारणं विधानं उत प्रकृतेरेवेति· तत्र तु
क्वादिप्राप्तिमात्रं हि पर्णतादेरपेक्षितं· या चोपदेशिकी प्राप्तिः प्राप्तिर्या चातिदेशिकी· सर्वा सा प्राप्तिरूपतानुल्या
तदनुवादतः विधीयमानं पर्णत्वं सर्वार्थमवगम्यते· ननु येनातिदेशेन विकृतौ प्राप्यते जुहूः। तेनैव पर्णता
पीतित्यर्थं तदुपदेशनं· नैवं प्रत्यक्षसिद्धत्वात् पर्णत्वं नानुमानतः चोदकात्प्राप्यते न विकृतौ प्राप्यते जुहूः। तेनैव
पर्णतापि पीतित्यर्थं तदुपदेशनं· नैवं प्रत्यक्षसिद्धत्वात् पर्णत्वं नानुमानतः चोदकात् तस्मात्सर्वार्थः पर्णतादयः। नैवं
द्विरुक्तिदोषः स्यात्प्राप्तस्यापि पुनर्विधेः द्वयत्वेन पदार्थानां भवेच्चेच्चोदकस्ततः तद्वर्जयुज्यते प्राप्तिः प्रकारस्त्व
निदिश्यते· पदार्थानां खलु प्राप्तिस्तद्विशेषणाभावतः। समुद्धितास्वत्ते सर्वे प्रकृतौ नाद्विशेषणं· तेन यावज्जुहू
प्राप्तिर्विकृतौ तावती वच· प्राप्तेव पर्णतापीतित्यर्थस्तस्य पुनर्विधिः अवश्यं च जुहूप्राप्तिः प्रतीक्ष्यो पर्णताविधेः तथा
सहैव पर्णपत्वं प्राप्तं न तु विधीयते· प्रकृतावेव पर्णत्वविधिस्तेन व्यवस्थितः॥ प्रकरणविशेषात्तु विकृतौ विरोधि स्या
तात्· सप्तादशसामिधेनीरनुब्रूयादित्यानारभ्यश्रुतं साप्तदश्यं किं प्रकृतौ उत विकृताविति संशयः· तदर्थं च किं

६२

62

प्राकरणिकेन पांचदश्येन तुल्यबलमुत दुर्बलमिति। तत्र द्वयोरपि वाक्यसंयोगाविशेषात् तुल्यबलतां मन्यते। न च प्र
करणेन कश्चिद्विशेषः वाक्यात् दुर्बलं यस्मात् तस्मात् प्रकृतिगामिताः पूर्ववत् साप्तदश्यस्य तथा प्राप्तेऽभिधीयते। सा
मिधेनीस्वरूपेण संबंधी वाक्यतो भवेत्। तन्मात्रसांगतेवेति संख्येयत्वात्। तामनर्थिके अपूर्वसाधनतां शेषलक्षितेऽसं
गतिर्नवेत्युक्तः न त्वलक्षणाबोधकस्त्वन्नीयं प्रकरणं स्वचेतः प्रकरणे हि विधीयमानस्य सर्वस्य प्रकृतापूर्वसाधनत्वं
स्वरसत इति पांचदश्यमपि तत्रैव विधीयमानं तादर्थ्येन विधातव्यमिति गम्यते। तादर्थ्यं च तत्साधनरूपसंबं
धे घटते न सामिधेनीस्वरूपसंबंध इति स्वरूपातिक्रमेण साधनरूपलक्षणा तत्र भ्यते। साप्तदश्यस्य तु स्व
स्वरूपमात्रं गम्यते नापूर्वार्थत्वं। स्वरूपस्य च सामिधेनीस्वरूपेणापि संबंधो घटत इति नान्वयोपपत्तये ल
क्षणा। किंतु विधीयमानस्य साप्तदश्यस्यानर्थक्यपरिहाराय प्रतिपन्नक्रतुसंबंधसामिधेनीलिंगवशाद्
विपरिवर्तमानमेव क्रत्वपूर्वं कथंचित् तदयमागतमपि तादर्थ्यसिध्यर्थं न तत्साधनत्वलक्षणाऽऽश्रयणीयेति
क्रतुसंबंधविप्रकर्षाद्दौर्बल्यं। अतः पूर्वनिविष्टपांचदश्यावरुद्धत्वात् तेनैव निराकांक्षा प्रकृतिमलभमानं साप्त

दश्यं विकृतिषु निवेक्ष्यते· तत्रापि न सर्वासु किंतु प्रकृतसाप्तदश्यासु मित्रविंदादिषु वेति दशमे वक्ष्यते नैनै
मित्तिकं तु प्रकृतौ न हि कारः संयोगविशेषात्· साप्तदश्या वैश्यस्येति यद्धौत्रसूत्रे निमित्तेन नैमित्तिकं साप्तदश्यं
विधीयते तत्प्रकृतौ वा स्यादुत विकृतावेति· प्रकृतेः पांचदश्यावरोधात् पूर्ववद्विकृतिषु उत्कर्षे द्वयोर्वा प्रक
रणाधीनत्वात्क्रत्वर्थत्वाच्च विकल्पे प्राप्ते अभिधीयते· नैमित्तिकं साप्तदश्यं प्रकृतावेव नित्यं पांचदश्यं विकृत्यनि
विशते· तुल्यप्रकरणत्वान्नोत्कर्षं तावदृच्छति· प्रकृतौ निविष्टो तावत्तत्रापि न विकल्प्यते· पांचदश्येन किंतस्य
बाधकत्वेन वर्तते· नित्यं सामान्यतः पूर्वं सावकाशं विधीयते नैमित्तिकं विशेषेण पश्चान्निरवकाशकं· नैमित्ति
कमतो हेतुत्रयान्नित्यस्य बाधकं· सामान्येन हि सर्वप्रयोगाणां पांचदश्यं तद्योवत्त्वलक्षणप्रावैश्यर्तकं प्रयोगं
नां स्कंदति· तावत्तत्रैव साक्षाद्विधीयमानं साप्तदश्यं प्रबलं भवति· तथा पूर्वमेव प्रकृतेः स्वाभाविकं नित्यं विधीयते
तेन तद्संजातप्रतिपक्षत्वात् न कस्यचिद्बाधकतयावगम्यते· नैमित्तिकं निमित्तसंयोगेन विशेषतया विधीयमा
नं पश्चात्तनं भवति· न च तदुत्पन्नप्रतिपक्षविज्ञानावष्टोऽस्यतिकत्वात् तद्बाधेनात्मानं नालं लब्धुं· लब्धव्य च ते

नात्माप्रत्यस्तवचनात्. अतः पूर्वगुणवाधकतयैव आत्मानंलभते. सावकाशंचनित्यंविप्राजकत्वेकेप्रयो

६३ योगे. अतोनतेनावश्यंनैमित्तिकविकविषयेनिवेष्टव्यं. नैमित्तिकमनवकाशंनित्यावाधेनेनशक्यतेवि

63 धातुं. विधीयतेचतदितिवाधकंत्वा एतेनकाम्यस्यापिगोदोहनादेर्गणस्यनित्यचमसादेर्वाधकत्वंव्या

ख्यातं. पूर्वंयस्तस्यनैमित्तिकेऽतिमंदइतिकृत्वाभाष्यकारः सूत्रिनमपिनैमित्तिकमतिक्रम्यतुल्यन्यायंका

म्यमुदाजहार. काम्यस्यहिक्रत्वर्थत्वाभावात्. क्रत्वर्थस्त्वमत्रसलतोभिन्नविषयतान्नतेनवाधितुंश

क्यते. तद्वाधे चक्रतौवैगुण्यापरार्गलनस्यात्. विगुणक्रत्वाश्रितात्गुणादपिफलंनस्यात्. योहिमकामेन्यवद

दतदृष्टिर्वैदुलांशगस्वामधिरोहतितस्याविनिपातएवभवतितद्वदिहापिमधुदृष्टिवदेवास्यगुणकामंप्रपद्य

तः क्रियाफलविनाशात्माविनिपातः प्रसज्यते. तस्मान्नप्रकृतौनिवेशः संभवतीतिविकृतिरेवागतिः अ

थवाक्रनवेचमसेनप्रणीयपुनः कामायगोदोहनेनप्रणेतव्यं. नचतुवाधसंभवः क्रतुवैगुण्यादितिभ राम

भवत्येवदिशेषाशंकातन्निराकरणायकाम्योदाहरणं. निराकरणेहेनवश्यंनैमित्तिकस्यापिअत्राम ६३

संधेयाः। आसन्नपुरुषार्थत्वमपरं चापि करणं तेन काम्यं बलीयः स्यान्नित्यान्नैमित्तिकादपि। पुरुषार्थे प्रयु
क्तो हि सर्वस्य प्रवृत्तिः काम्यं च फलस्य प्रत्यासन्नं शीघ्रं प्रयुज्यते गोदोहनं कर्त्तव्यस्क चमसस्त्विरं योतिगुरुदुर्ब
लः। अनेनैव हेतुना नैमित्तिकादपि कर्त्वर्थात्। सा मतद्रव्यात्पुरुषार्थस्य एकविंशत्याधनवचनस्य बलीय
स्त्वं भवति। तस्मात्तेन साम्नद्रव्यं पांचदश्यं च द्वयमपि बाध्यते सत्यपि भिन्नविषयत्वे प्रणयनादिद्वारतुल्यतया
स्ति विरोधः। ननु द्रव्यक्रत्वर्थस्य तस्मिन्प्रयोगे बाधः। प्रयोगांतरे त्वसाववस्थाप्यते। सामान्येन हि सः क्रतोः प-
शुकामप्रणयनप्रयोगे तु वाक्यान्तर्गतेऽत्र समः संनिधिमात्रेण संबध्यते। गोदोहनं तु तत्रैव वाक्ये क्रतुमि
ति बलीयः। न उक्तं। यत्पशुकामप्रयोगे त्वक्रमेण चमसं गतः श्रौतात् गोदोहनात्तत्र चमसस्यानिरंक्रियेति। बा
धितत्वादेव न तदानीं चमसादेरंगत्वमघातादेरिव क्लृप्तलादौ। अतस्तदभावेऽपि पेनास्ति वैगुण्यं। येन क्रियाफल
स्य विनाशः। तद्व्यायाच प्रणयनाभ्यासः स्यात्। गुणहानिर्हि वैगुण्यं न चास्य गुणतां गतस्तदा गोदोहनं च न गुणाः क्रतो
ःकामाय चोदनात्। किं तु प्रणयनं द्रव्याहीनमंगं क्रतोस्तदा काम्यनैमित्तिके तस्मात्क्रतौ नित्यकबाधके। ॥ इत्यर्थे

यथान्येनारभ्यावादाः स्थितेनारभ्यवादत्वेसं प्रत्येतद्विचार्यते ॥ किमाधानं प्रकृत्यर्थमग्निमात्रार्थमेव वा ॥१॥ तत्र प
र्णमयीन्यायात्साम्नाप्रकृतिगामिता उच्यते क्रतिसंयोगादाधानस्याग्निशेषता ॥२॥ प्रसिद्धक्रतुशेषत्वं प्रक
तावुपदिश्यते । पर्णत्वमन्यथादोषो द्विरुक्तिः स्यादितीहतु न कस्यचित्क्रतोरंगमिदं क्रत्वाद्यभावतः वाक्य
लक्षणपास्याच्चेन्नाग्न्यंगत्वोपपत्तितः वा ॥४॥ स्यादेतत् यथानारभ्याधीतमपि पर्णमयीत्वं जुहूस्वरूपवर
त्वे सत्यानर्थक्यात्क्रतुसाधनांगलक्षणाया विधिमानं वाक्याद्देवक्रत्वंगं भवतीति एवमाधानमर्योतिमे
वंजुह्वादयोस्याकृतिविशेषाद्विनापि पर्णमयीत्वे नैतदाकारसंभवात्तत्स्वरूपार्थत्वे विध्यानर्थक्यात्प्रकृतक्रसा
धनांगलक्षणाद्दहतादाहवनीयादिस्वरूपस्याद्दष्टार्थत्वात् क्रत्ववगतेन तत्स्वरूपार्थत्वेपि विधानर्थक्याभावान्ना
साधनांगानक्षणया क्रत्वर्थत्वं युक्तमितिविशेषः एतेन पवमानेष्टीनामप्यक्रमोर्थत्वं व्याख्यातं ॥ ता सायमग्निः
प्रकृतितः प्रयाजवत् ॥ आसन्निकमिह पवमानेष्टिषु किं पवमानेष्टयः कर्तव्या नेति । तत्र प्रकृतितस्तासु पव
मानेष्टिसंस्कृतः आप्रोत्स प्रसक्तेर्थेन कार्या सास्विष्वयोपिता ॥१॥ न तु याः तदर्थाः तासामप्यान्याः कार्याः ता

सामर्थ्यन्यायादित्यनवस्थापत्तिः। उच्यते नैष दोषोऽस्ति सामर्थ्येन व्यवस्थितेः यावतीः शक्नुयात्कर्तुं तस्मिन्नहनि ता

वतीः। १। कुर्वतो नानवस्था स्यादिति प्राप्तेऽभिधीयते। न तावदतिदेशेन प्राप्तिस्तासामेवं गतः न हि ताः प्रकृतेरंगु

मिति प्रागेव दर्शितं। प्रकृतौ चोदनायां यत्कथंभावो न संगतं तदेव चोदनालिंगादि कृतावतिदिश्यते चोद

केन नतस्तासां नास प्राप्तिर्न विद्यते। अंगत्वे सत्यपि तासां नातिदेशेनोपकल्पते विधीयन्ते यदा तान प्रकृतौ सं

निता सदा परा हि पवमानेष्टयो विधीयमानाः कथंभावापेक्षिण्यः प्रकृतिमालोचयंति तदा प्रकृतेः साकृत्य

त्वान्न ततस्ताः शक्यंते गृहीतुमिति तदतिरिक्तामेवेतिकर्तव्यतां गृहीत्वा संतुष्टाः पवमानेष्टयो न पुनरात्मा

नमपि गृह्णन्ति यत्क्रममग्निप्राप्तेरर्थं तस्तासामपि माप्राप्तिरिति। अत्रोच्यते। सत्यं प्राप्यंते अग्नयस्ते तत्संभ

वाहृाध्यंते। ते हीष्टीनां साध्यभूताः कथमिव तासां साधनीभवेयुः। न न्वत एवाग्न्यर्थमन्याः क्रियंते। तासा

धितो ह्याग्निभिरन्या इष्टयः करिष्यंत इत्युक्तं। न सर्वे यातावत्प्रथमं काश्चिदिष्टयोऽग्निष्वेव कर्तव्याः। ताभिश्च

किमग्नयो जायते न वा यदि नेत्याह किमर्था ताः क्रियंते। अथ जायन्ते सिद्धेऽर्थे नान्याः कार्याः अग्न्यर्थमेव हि ताः क्रि

६५

65

पतेते च सिद्धा इति नान्याभिः प्रायोजनं तस्मात्क्रयवमाने ष्टित्सुपवमाने द्वयः कर्त्तव्याः॥ तुल्यः सर्वेषां पशुविधिः प्र
रणाविशेषात्। एवं प्रकरणास्य पूर्वैः सवविरोधाविरोधविचारं सप्रासंगकं समाप्याधुनास्थानस्य पूर्वैः सह
हविरोधाविरोधो विचार्यते। पाठाद्येन प्रकृतिविकृतीनां समानासमानविधानत्वं विचारितं। अत्रापि तदेवानु
वर्तते। ज्योतिष्टोमे त्रयः पशवः तत्राग्नीषोमीयः क्रपसंनिधावुत्यन्नोव चनात् औपवसथ्ये हन्यनुष्ठीयते
तस्मिन्नेवाहनि सवनीयाम्नानम्नायः पशुरग्निष्टोम इत्यादि। तत्रैव पशुधर्माः यूपछेदादयः पठिताः सोऽपि
हनि पुनः सवनीयाम्नानं आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति
। अनुबंध्यस्त्ववभृथांते समाम्नातः। तदिह विचार्यते किमेते धर्मास्त्रयाणामपि पशूनां साधारण्येन वि
धीयंते किंवा सवनीयस्यैव। अथवाग्नीषोमीयसवनीयवनीययोरुत्ताग्नीषोमीयस्यैवेति। तदर्थं च कि
मग्नीषोमीयस्य स्थानं ज्योतिष्टोमिकेन प्रकरणेन सवनीयावांतरप्रकरणे ववा विरुध्यातेनेति। तत्सि

राम

ध्यर्थं किं सवनीयानामोपवसथ्ये द्विप्रकरणमस्ति नास्तीति चिंतनीयं॥ ततोऽप्येतद्विवेक्तव्यं। किं औपव

६५

सध्येह्निसवनीयोत्पत्तिरुक्तसोत्येहनीति। तत्र प्रकरणाज्ज्योतिष्टोमगृहीता धर्मोस्तदंगोत्पुपशुसुविज्ञापना

नाः तत्प्रकरणाविशेषात्सर्वार्थो भवति ज्योतिष्टोमद्वारेणाह्निपश्वनांधर्मविधौ प्रकरणं न स्वतः कस्यचित्प्रक

रणं अग्नीषोमीयस्यापि स्थानमात्त्वंतत्त्वप्रकारणानुवंतं सवनीयएमेनापि सुत्यायामुत्पत्तिरितत्रगुणार्थे

श्रवणमितिनास्त्येवविशेषतः प्रकरणं। अनुवध्यस्यत्वनाशकनीयमेव। तस्मात्सर्वार्थाः स्यादेवमविशि

ष्टं प्रकारणं पदिज्योतिष्टोमद्वारं स्यात् सवनीयस्यतु स्वत एव विशेषतो वांतरप्रकरणप्त्तिसोत्येहन्याश्व

नग्रहणेमरकालगुणार्थं श्रवणं। औपवसथ्येह्नि निगुरणाभावात्सवनीयानामुत्पत्तिः। अतः प्रकरणा

नदर्थाः। येत्ववांतरप्रकरणांनेछंतितेषां सवनमाध्यविरोधः। रयस्त्वानिष्टप्रसंजनं समिदादिषु सोमिकध

र्मप्राप्तिरितितत्पित्रयज्ञेसाधिकारेपितुल्यं अथ तस्य तस्मात् पितृभ्यः पूर्वेद्युः क्रियत इति देवताविधेर्नात

यत्कत्वं समिदादिष्वपि मन्त्रवर्णाद्देवताविधिरुभयोस्तुपाजवदस्त्येवमाम्नाय सोमिकधर्माः दार्शपौर्णमासि

कधर्मोस्तप्राप्नुयुः वैमृधवदितिचेत्तुदमपिपित्र्ययज्ञेतुल्य। अथ तत्र द्रव्यदेवतादिसंनिपातिपो फल्पा

नातिदेशः तत्समिदादिष्वपि तुल्यमिति दर्शितं प्रकरणाधिकरणे। तस्मादस्त्यवांतरप्रकरणं। यदि च एतन्नेष्यते
ततः स्थानादेव सवनीयार्थता वक्तव्या स्यात्। न चाग्निषोमीयस्याप्यवच्छिन्नमिति केवलं तत्। सवनीयार्थत्व
पक्षोऽयं वा निर्मूलः स्यात्। ननु तवाप्युभयार्थत्वपक्षो निर्मूलः। यथा न निर्मूलस्तथा वक्ष्यामः। तस्मात्सवनीया
र्था इति द्वितीयः पक्षः। मन्त्रीमणं तत्सवनीयार्था इति स्थानादग्नीषोमीयार्था अपि भवेयुः। ननु प्रकरणा
त्स्थानं दुर्बलं तत्कथं ततः अग्नीषोमीयशेषत्वं धर्माणां स्यात् उच्यते। यद्यपि प्राकरणिकेन सवनीया
र्थत्वेन धर्मा नि एकाशास्तथापि अग्नीषोमीयस्य पशुधर्मा ये स्थितास्तेनापि संबध्येरन्। यथोपदेशेनावग
तप्रकृतत्वगमाभावाद्धर्मा दुर्बलेनाप्यतिदेशेन विकृतेरपि भवन्ति। एवमेतेऽप्युभयार्था इति प्राप्ते ब्रूमः। अ
ग्नीषोमीयशेषत्वं यदुक्तं सत्यमेव तत्। सवनीयार्थतां तेषामवजानीमहे कुतः। सवनीयस्य धर्मेषु नास्ति प्र
कृतं यतः। न खल्वौपवसथ्येऽह्नि सवनीयो विधीयते। अतः प्रकरणं तत्र सवनीयस्य लभ्यते। अवांतरविप्रक
र्षोत्पगुणस्य तु विधित्सया। कीर्त्यते सवनीयोऽत्र सोऽत्यन्तेषु विधीयते। कर्मणांश्च विधिर्यत्र तत्प्रकरणं भवे

त्वा।नतुपत्नीगुणार्थेनश्रवणंतत्रविधीयते।तस्मान्नसवनीयस्यप्रक्रियागुणसन्निधौ।यत्तौपवसथ्यवाक्येगुणो
नास्तीत्युक्तंअस्तिप्रचारविप्रकर्षःआग्नेयःपशुरित्याद्यनुकीर्त्यपर्यावैमत्स्यइत्यादिनानीदितातत्परिहा
रहूपेणवययाप्रातःसवनेचरंतीत्यादिनाप्रचारविप्रकर्षोविधीयतेशक्यतेचसौत्येष्वुत्पन्नंकर्मानूद्यप्र
चारविप्रकर्षोविधातुंउपादेयत्वात्सुत्यावाक्येतुकालोगुणः।नचासावतुपादेयतादौपवसथ्योत्पन्नंदूर
स्यापिपरिवर्तमानकर्मानुवादेनविधातुंशक्यतइतिनत्वत्तावत्कर्मास्तिविधातव्या।नन्वौपवसथ्येष्व
त्पन्नंकर्मप्रचारोत्कर्षादुत्कृष्टंप्रातःसवनेपिपरिवर्ततइतिशक्यतएवकालविधिः।मैवं।येहिवयाप्रचा
राश्रत्यंचःपदार्थास्तेषामेवतदादिनाभिसंबंधादितिन्यायादुत्कर्षःस्यात्पूर्वेत्वाह्यानेषामपिनस्यात्
।उपाकरणादीनांतुप्राचांपदार्थांपदार्थानांनास्त्येवोत्कर्षः।तस्मादुत्याकरणस्यप्रातःसवनेविपरिव्र
त्यभावान्नतस्यकालविधिःनभवतीत्सुत्यतिविधिरेवापंइतरस्तगुणविधिरितिप्रकरणाभावान्नसवनी
यार्थत्वं॥स्थानालग्नीषोमीयार्थत्वापत्तुमह्याप्रकरणेनस्थानंबाधितंज्योतिष्टोमगृहीताःसर्वेपशूनामित्यु

कंतत्रोपचर्यते। पशुधर्मो हि पशुयागमाकांक्षति। ज्योतिष्टोमस्य सोमयागो न पशुधर्मान्गृह्णाति। यदि न कश्चि
दपि पशुधर्मान्गृहीतुं शक्नुयात्ततो गत्यभावाज्ज्योतिष्टोमगृहीताः संतस्तत्रानर्थक्यात्तदंगेषु वर्तेरेयुः श
क्तिस्थानादग्नीषोमीयो गृहीतुमिति तदर्था धर्माः। न सर्वेषाममी नापि सवनीयस्य नोभयोः अग्नीषो
मीयपरा एवातो विधेरूर्ध्वमव्यवस्थिताः। अन्यत्रातिदेशेन गच्छन्ति न विधानतः। विधिस्तु देशस्य एवेति स तत्रैव वि
धिरुद्रात्ततः॥ दोहयोः कालभेदादसंयुक्तं शृतं स्यात्॥ दर्शपूर्णमासयोः सायंदोहः पूर्वेद्युः प्रातर्दोहश्चापरे
द्युर्दोहधर्माः शाखाहरणादयः पूर्वेद्युः क्रियन्ते ते किं सायंदोहार्था उत उभयार्था इति संदेहे पूर्ववदनुष्ठानसा
देश्यादुवातरग्नकरणाच्च सायंदोहार्था इति प्राप्तेऽभिधीयते। प्रकरणविशेषादुभयार्थाः। नहि स्थानप्र
करणस्ये स्ते न च दधियागस्यावांतरप्रकरणमत्रास्ति। न च स्थानमपि प्राधानस्य विद्यते तस्मादपरेद्युरे
वानुष्ठानात्। दधिसिद्ध्यर्थास्तु केचिद्धर्माः पूर्वेद्युः क्रियन्ते न च तदर्थाः शाखाहरणादयः प्रधानार्थत्वात्त
स्मादुभयार्था दोहधर्माः॥ तद्वत्सवनान्तरे ग्रहाम्नानं॥ ज्योतिष्टोमे प्रातःसवनसन्निधौ ग्रहधर्माः समाम्ना

ना:उपयोगे अन्येग्रहाः सार्वेने ऽनुपयोगे ध्रुवइत्येवमादयः। नेकिंप्रातःसवनिकग्रहार्थाः उतप्राकरणिकसर्वग्र
हार्थाइतिविचारः पूर्वत्रस्थानमपिनास्तीत्युक्तं इहत्वं सहितग्धंस्थानमितिविशेषाशंका। प्रकरणविशेषा
त्तुसर्वार्थाइतिसिद्धांतः॥ रशनाचलिंगदर्शनात्॥ अग्नीषोमीयेपूपपरिव्याणंविहितंपरिव्यणस्यवैरशने
शनेति। सवनीयेपुनःपरिव्याणानरविहितं आश्विनंग्रहंगृहीत्वोपरिनिष्क्रम्य यूपमादित्यंपरिव्ययतीतिपरिव्याण
साधनभूतारशनानुक्त्वमो ऽप्यग्नीषोमीयकर्मेविहिताः त्रिवृद्भवति दर्भमयीभवतिप्रविष्टांताकर्तव्येत्या
दयस्तेकिमग्नीषोमीयपरिव्याणार्था उतसवनीयपरिव्याणार्था अपीतिसंशयः। तत्रक्रमादग्नीषोमी
यार्थाइतिप्राप्तेभिधीयते। क्रत्वेनयूपसंबंधिपरिव्याणंगतांगताः। नाग्नीषोमीयधर्मास्तुसात्वतेवार्थ
वत्वतः। सवनीयपरिव्याणमप्येनयूपसंगतं। तस्मात्तत्रापिरशनासहधर्मैःप्रत्यपतइति॥ आराच्छिष्टमसं
युक्तमितरैःसन्निधानात्॥ अतःपरंप्रासंगिकीकथालक्षणसंगतिःस्पष्टैवाग्रहधर्माणांसाधारणपंपूर्वमुक्त
तेकिमनारभ्याधीतयोरप्युग्राम्युपोरपिभवंति। उतप्राकरणिकानामेवेतिसंशयः। तत्रप्रकरणादेतेतद्धर्मे

महमान्त्रगाः।नानारभ्यसमाम्नातग्रहार्थो सुरसन्निधेः। उच्यते। ग्रहाणांप्रक्रियानास्तिपथाधर्मव्यवस्थितिः।नापि
प्रकरणंतेषांविशेषणतयेष्यते।नचैसोमप्रकरणगतास्तेषामयी धर्माइति किंतु यजेः प्रकरणंतेन प्रकृतेनविशेष
णान्।धर्मास्तत्साधनानांस्थितग्रहाणांशेषतामियुः।येचानारभ्यविहितायेचप्रकरणेग्रहाः।सर्वेतत्साधनत्वात्तद्धर्मसं
बंधमाप्नुयुः॥अग्न्यंगमप्रकरणेतद्वत्॥अग्निप्रकरणेसमाम्नाताइष्टकाधर्माः अखंडामकृष्णामित्येवमा
दयः किंप्राकरणिकीनामेवेष्टकानां उतानारभ्याधीतानामपिचित्रिणीरूपदधातीत्येवमादीनापूर्ववदेवसंश
यपूर्वोत्तरपक्षाः।पूर्वत्रोभयाभ्ययोरनारभ्योत्पन्नयोरपिप्राकरणिकेनविनियोगोस्तीतिप्रकरणसंस्पर्शोप्युक्तो
धर्मसंबंधः।चित्रिण्यादीनांतुविनियोगोप्यनारभ्यवादेनैवेतिप्रकरणसंस्पर्शाभावान्नतद्धर्मसंबंधइतिविशेषा
शंका।प्रकारणसंस्पर्शाभावेपिप्रकृतापूर्वसंस्पर्शेतत्साधननिवेशिनोधर्मास्तासामपिभवंतीतिसिद्धांतः॥नैमित्ति
कमतुल्यत्वादसमानविधानंस्यात्॥ज्योतिष्टोमेराजन्यवैश्ययनिमित्तेनफलचमसश्चोदितःसचेज्याविकार
रइतिस्थितं।संस्पभिषवादिसंस्काराः तेकिंनैमित्तिकस्यापिफलचमसस्यसमानाः उतनित्यस्यैवसोमस्यनैमि

तिकं नु न हि कारणमिति विचार्यते। तत्र अपूर्वस्याधानत्वांशे संस्कारविधयोपपन्नः। तस्मान्नैमित्तिकेऽपि स्युः साधनत्वाद्वि-
शेषतः। सोमममभिषुणोतीत्ययमर्थः। अभिषुतेन यजेतेति। फलचमसेनापि चेज्यते। अतस्तस्याप्यभिषव उपदि-
ष्ट एवति। तेन व्रीहिप्रवाणितासमानविषयो यथा नित्यनैमित्तिकेष्वेव समानविधिनी तथा॥ उच्यते साधनेनैव नि-
त्यं संस्कारसंगतिः। सरूपेणात्वसोऽयुक्तानविरूपेणाप्युच्यते। संस्कारा हि निमित्तसंयोगाभावात्क्रतोः स्वभाविकां-
गत्वेन विधीयमानास्तदनुरूपमेव द्वारमाश्रयन्ते। व्रीहिवत्त्वयवा अहिवत्त्वयवा अपि प्राप्तिरूपेण क्रतोर्नि-
त्या एवेति धर्मविधेरवैरूप्याच्छुक्कुर्वन्ति द्वारतामुपगन्तुं। यदप्यनुष्ठानरूपेणानित्यत्वं न ह्यहीनाम-
पि तुल्यमेवेति नित्यत्वाभावादङ्गत्याऽवघातादीनाम् नित्यद्वाराश्रयणमयुक्तं। आम्नानस्वरूपेण च नित्य-
त्वाद्व्रीहियववद्विध्योर्नित्यवदाम्नानं संस्कारविधौकवाक्यत्वं शब्दरूपेषु समानताघुल्पते। शक्यते हि वक्तुम-
वहननैर्व्रीहिभिर्यवैर्वा यजेतेति फलचमसस्तु निमित्तसंयोगादाम्नानेनैवानित्यः कथं नित्यैर्यावक्रतुभा-
विभिर्यवैर्वा व्रीहिभिरेकवाक्यतामुपेयात्। विरुद्धं खल्वेतदभिषवेणानित्यं ज्योतिष्टोममुपकुर्यादनित्यफलच-

69

मसेननित्यकर्त्तव्याभिषवसंस्कृतेनयजेतेति। यद्यभिषुतेनफलचमसेनेत्युच्यतेततःफलचमसोपिनित्या
भिषवद्वारमितिनित्यःस्यात्। सोमस्त्वाम्नानतःप्रयोगतश्चनित्यःराजन्यवैश्ययज्ञेपिराजन्यचमसादेवसो
मोनिवर्त्तेरे अन्यत्रतुसोमस्थितएवतस्मात्तत्रैवाभिषवादिविधिः। अपिचनित्यंनैमित्तिकंचनप्रयुक्तयहि
धीयतेकिंतुनित्यविधापयश्चाग्नेमितिकंविधेयंतद्धिनिमित्तेसतिकतिक्रतोर्विशेषरूपेणवोच्यतेनिमि
त्तत्वेनद्रव्यःक्रतुरितिएनत्वस्वारस्मिकरूपेप्रासिद्धेशक्यतेवक्तुंतस्माद्यस्यावेलायांक्रतोःस्वाभाविकं
नित्यांगंविधीयतेतस्यापेवसंस्कारविधयस्तद्विशेषणत्वेनस्वार्थंविधायनिवृत्तव्यापारानभूयःशक्नुवं
तिनैमित्तिकेनापिसंबद्धुंआवृत्तिप्रसंगात्। तस्मान्नित्यार्थोधर्मोनैमित्तिकस्यत्वतिदेशेनभविष्यं
ति॥ ॥प्रतिनिधिश्रुतत्वात्॥मुख्याभावेप्रतिनिधिर्वक्ष्यतेसाकिंमुख्येनसमानविधानोनेति। मुख्याभा
भावनिमित्तत्वात्पूर्ववदसमानविधौप्राप्ते उच्यते। स्यादेवयदिद्रव्यान्तरमिहयागसाधनत्वेनोपादीये
तव्रीह्यादयस्त्विहसकलीसम्भवात् विकरलाउपादीयतेनीवारगतास्तदनुषंगादवर्जनीयत्वयानी

वारोपादानसाधनत्वे प्रमाणाभावात् व्रीत्यंशश्च व्रीहिगता इव नीवारगता अपि संस्कारविध्यन्विता
एवेति समानविधानता। नियमार्थो गुणश्रुतिः। अथ यत्र श्रुतः प्रतिनिधिः। यथा यदि सोमं न विंदेत् पूती
कानभिषुणुयादिति। तत्र वचनेन न एव पूतीकानामेव साधनत्वं विधीयते न नीवारवद्साधनात्वं अतो द्र
व्यान्तरमिदं सोमाभावे जिमितं तेन साधनतापन्नफलचमसवद् समानविधानं। न स्वतन्त्रपूतीकायागसाध
नत्वेन विधीयन्ते सोमाभावे पूतीकैर्यागं कुर्यादिति किं तर्हि सोमावयवोपलक्षणतया प्रतिनिधिनियमोऽस्य
नाभावे विधिरिति वक्ष्यते। तदेवावचनव्यक्तिः यत्सकलसोमावयवाभावे विकल्पावयवानुपादानीत तन्पूती
कैरिति तस्माद्त्रापि सोमावयवानामेव तत्साधनत्वात्पूर्ववत्समानविध्यं॥ संस्थास्तु समानविधानाः
प्रकरणाविशेषात्॥ नैमित्तिकं न्वत्र कर्तव्यर्थनित्येन समानविधानमं न भवति नैतिकस्मात् नित्यत्वात् तद्द्वारेणाध
मोंऽशनित्यवक्कत्तव्यर्यतानुपपत्नेरित्युक्तं। इह काम्यागुणश्रितं यन्नेकिमाश्रयभूतयाक्रियया समानविधाना
स्तद्विकारा इति तत्र काम्यस्य फलवत्वात्क्रतुवदेवस्य यमितिकर्तव्यताम्याहित्वा अतद्द्वारेण कर्तव्येत्वमंगानांपेन

शा०त०
७०
70

ननैमित्तिकवद्विरोधः स्यात्। अतो नगतार्थमिदं संस्थाग्रहणं च प्रदर्शनार्थं। अन्योपि दाक्षायणयज्ञादिः उदाहर्तं
व्यः ज्योतिष्टोमस्य चतस्रः संस्थाः अग्निष्टोम उक्थ्यः षोडश्यतिरात्र इति अग्निष्टोमस्यैव विधानंतरं अत्यग्निष्टोमः अ
त्रषोडशिग्रहणमत्यग्निष्टोमे एव नान्यस्य गृह्णीयादिति वाजपेय पश्चषोडशिन एव भेदः। अप्तोर्यामश्चातिरात्रस्य
एतदभिप्रायं सप्त सोमसंस्था इति स्मरणं न च अग्निष्टोमसंस्थाकृतत्वर्थाकृतोस्तु फलं ज्योतिष्टोमेन स्वर्गकामइति
।उक्थाद्यः संस्था ज्योतिष्टोमाश्रिताः फलेविधीयंते पशुकाम उक्थ्यं गृह्णीयात् षोडशिना वीर्यकामस्तुवीत।
अतिरात्रेण प्रजाकामं याजयेदिति। ननु ग्रहणादीनामत्र काले विधानं न संस्थायाः उच्यते। उक्थ्यशब्दोयं स्तोत्र
विशेषवचनस्तत्संबंधाद्ग्रहो उपचर्यते। न चेहोपचाराश्रयणमुक्तं समाप्तेश्च स्तोत्रयवधिन्या वाचकत्वे तत्
सर्वार्थेन तत्समानीतमिदानीं नोपभृत्यस्ति । प्रयाजानुयाजेभ्यस्तदित्यविशेषश्रवणात् सर्वं प्रयाजार्थमौपभृतं तत्र
याजशब्दाच्चतुर्थीविभक्तिश्रवणात् । न याजशब्दानन्तरं या विभक्तिः सानुषज्यते प्रयाजेभ्य इति । न तत्र बहुवचनान्त
वृर्थं न चतुर्थी तमयोरेव अतः सर्वं प्रयाजार्थत्वादानीतमिदानीमुपभृति नास्ति । केवलमनुयाजार्थमेवास्ते तस्ये
दं समानयनं अनुयाजप्रयुक्तसंस्कारमात्रत्वादप्रयोजकं । उभयोरपि जौहवौपभृतयोः सर्वप्रयाजविष
ययोरेकार्थत्वाद्धि कल्प्यः । उच्यते समानयनमुद्दिश्य कालमात्रं विधीयते । अदृष्टकल्पनानेकविधानं चान्यथा भ
वेत् । यदुपभृति प्रयाजार्थं गृहीतं तस्य प्राप्तमेव जुह्वामानयमनूद्य कालमात्रं विधीयते । अतिहायेडो बर्हिः प्रतीति

राम
९३

।तथाहि सत्यत्यार्थविधानं हृद्वार्थं च समानयनं भवति।अनुयाजार्थस्य त्वहृद्वार्थमत्यसत्ताप्राप्तस्यारणेवि
विधीलिप्यते तस्य च काल इत्यनेकार्थविधिदोषोऽदृष्टकल्पना च स्यात्।अतः प्रयाजार्थस्येदं समानयनं
प्रयाजहृद्यं कर्तुं क्रियत इति प्रयोजकमेवास्य।प्रयाजानुयाजेभ्य इत्यविशेषश्रवणं कालविधिवलादुपरि
तनप्रयाजहृद्यविषयं उपसंह्रियते।एवं च जौहवमाघाराणामेतत्प्रयाणां भवतीति विषयभेदात्समुच्चयः॥त
त्रोत्पत्तिरविभक्तास्यात्।चतुर्जुह्वां गृह्णाति अष्टावुपभृति चतुर्ध्रुवायामित्युत्पत्त्यानि आज्यानि सार्वाणि।कि
मविशेषेण सर्वकार्यार्थानि उत जौहवं प्रयाजार्थमौपभृतमनुयाजार्थं अथवा जौहवं प्रयाजार्थं औप
भृतमुभयार्थं ध्रौवं तदतिरिक्तविषयमिति संशयः।उत्पत्तावविशेषेण सर्वार्थं प्रतिभोक्तमः।अथवा युत्यात्तु
वादृष्टप्रयाज्याद्यर्थता वचः।यदि तु यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदिति वचनात्केवलप्रयाजार्थं स्यात्।त
तो यदुपभृति अनुयाजेभ्यस्तदिति वचनात् तदपि केवलानुयाजार्थं प्रसज्येत तदनु तदमात्रं प्रयाजवाक्यमपि तथा स्यात्तु
अविशेषादित्येतावानत्र प्रश्नः पक्षः।नानर्थकं वचो युक्तमर्थवत्त्वस्य संभवे।तेन जुह्वां प्रयाजार्थमितरार्थं तथे

शान्त्य
९४

९५

तरत्। न हि प्रमाणबलादापातमप्यनिष्टमिति शङ्कामुत्सार्य। अतो भवत्वेयौ ऽस्तु केवलानुयाजार्थं जौहवं च प्रयाजा
र्थमिति द्वितीयः पक्षः। जौहवस्य प्रयाजैकशेषत्वं युक्तमीरितं। अनुयाजैकशेषत्वमितरस्य न सम्भवते। यदुपभृति
प्रयाजेभ्यस्तदिति वचनादुभयार्थं ततः। अनुयाजेभ्यस्तदिति वचनमप्यत्यानुवादः॥ तदष्टसंख्याश्रवणात्
अष्टावुपभृति गृह्णातीति किमष्टसंख्येकग्रहणविधिः उत चतुःसंख्यग्रहणद्वयविधिरिति विचारः। विधीय
ते ऽष्टसंख्याकं ग्रहणं श्रूयते हि ततः। लक्ष्यते ततः संख्याद्वयमत्राष्टसंख्यया। न च श्रुतिसंभवे लक्षणा युक्ता। च
तुर्गृहीतं जुहोतीति सामान्यवचनं प्रयाजानुयाजयोर्विशेषतो ऽष्टगृहीतविधानात् बाध्यते। उच्यते चतुर्गृही
तं होमांगमष्टसंख्याश्रुतिः पुनः। ग्रहणे तेन होमांगं चतुष्ट्वं बाधते न सा। न तु ग्रहणस्य होमार्थत्वात् तथात्
र्थातुल्यार्थतां प्राप्य बाधः स्यात्। केवलग्रहणे तेन होमांगं चतुर्गते हि अष्टसंख्या निष्फला स्यात्। उच्यते। प्र
धानांगं चतुःसंख्या ग्रहांगमितरा पुनः। प्रधानांगं च नांगांगमलं भवति लाघितुं। तेनेयमष्टसंख्या प्रधानांग
भूतां चतुःसंख्याद्वयमत्राष्टसंख्यया। न च श्रुतिसंभवे लक्षणा युक्ता चतुर्गृहीतं जुहोतीति सामानन्यवचनं प्रयाजानु

राम
९४

याजयोर्विशेषतो ग्रहहीनविधानात् बाध्यते। उच्यते चतुर्ग्रहहीनं होमागमस्य संख्याश्रुतिः पुनः। ग्रहणेनेन
होमांगं चतुष्ट्वं बाध्यते न स्यात्। ननु ग्रहणस्य होमार्थत्वाद्दर्वीतुल्यार्थतां प्राप्य बाध्यः स्यात्। केवलग्रहणां
गत्वे तु हि अष्टसंख्या निष्फला स्यात्। उच्यते। प्रधानांगं चतुःसंख्या ग्रहणांगमितरत् पुनः। प्रधानांगं चना
गमवति बाधितुं। तेनेयमष्टसंख्या प्रधानांगभूतां चतुःसंख्यां बाधितुमशक्नुवन्ती ग्रहणमात्रांगतां च निष्फ
लत्वाद्दनामार्दयंती चतुःसंख्याद्रूपहस्तणार्था विज्ञायते॥ ॥इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्र
दीपिकायां चतुर्थाध्यायस्य प्रथमः पादः॥ स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात्। अग्नीषोमीयपशोश्छ
यते यूपस्य स्वरुं करोतीति स्वरुणा पशुमनक्तीति। तत्र विचारः किमेष स्वरुर्यूपात् स्वयमेव निष्पन्नः छेदनादीनां यू
पधर्माणां स्यादिति एतेष्ववदानस्य प्रयोजकः उत यूपमनुनिष्पन्नः शकलो गृहीतव्य इति तदर्थमिदं चिंत्यते। किं
स्वरुं करोतीति स्वरुभावना विधीयते तस्याः स्वकरणेति कर्तव्यताकांक्षायां यूपस्य स्वरुमित्यनेन यूपशकलो लक्ष
णया स्वाधिरादिच्छेदसंकरणे तेन छेदनादीनि कर्माणीति कर्तव्यतात्वेन समर्पयति। तथोत्पन्नश्च स्वरुः रित्य व

शा॰ चं॰ ४
२५
25

स्वरुणायस्रुमनक्तीति विनियुज्यते उतान्येन वा केनांजनसाधनं स्वरुरित्यवगन्तेकलो सावयादे यद्द्रत्यपेक्षाय
यांयूपस्य स्वरुमित्यनेन यत्स्वरूमुपादत्ते तेन यूपादिति वैधीयते । तत्र करणेति भावनावाची सा च श्रुत्या विधीयते
। वाक्यार्थो विधिरन्याय्यो लक्षणा चाम वाभवेत् ॥ अञ्जनसाधनत्वेनावगतस्य हि स्वरोरर्थप्राप्तमादानमनू
द्य यूयादिति विधेर्वाक्यार्थविधानं करणेतिश्चापूर्वभावने वचनः सन्नुपादानं लक्षयेत् । भावनाविधिस्तु श्रुत्या
भवति करोत्यर्थो नद्दति स एव न्याय्यः तस्याश्च करणेति कर्तव्यता स्ववाक्यगतेनैव यूपशब्देन तत्रोपस्थेनयो
जकः स्वरुः । नैवं ॥ बह्वर्थविधिरेवं स्यान्मत्वर्थशब्दस्य लक्षणा । अल्पार्थविधिरस्माकं जघनस्य च लक्षणा । स्व
रुभावनायां हि करणेतिकर्तव्यताविशिष्टायां विधीयमानायामतिभारः । इतरं विशेषणमात्रविधानं मुख्यस्य
च यूपशब्दस्य तत्र त्यक्ते लक्षणा मत्पक्षे जघन्यस्य च करोतेः प्राप्तस्वरूपादाउ प्रदानकं नार्थत्वात् ॥ दीक्षितस्य
दण्डधारणं विधाय पुनराम्नातं । क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति किं मैत्रावरुणाय दण्डप्रदानं दण्डस्य प्र
योजककर्मकर्मणे उत प्रतिपत्तिकर्म प्रयोजककर्मणि । तत्र द्वितीयाश्रुति संयोगात् कृतार्थता च धारणे मैत्रावरु

राम
१

णहस्ते संप्रक्षेपः। प्रतिपादनं दीक्षितधारणे कृतार्थो दंडः प्रतिपत्त्यपेक्षः॥ द्वितीयपक्षे च तत्प्राधान्यं गम्यते तेन दानस्य
।अतो मैत्रावरुणहस्ते प्रक्षिप्यते उच्यते। चतुर्थ्या संप्रदानत्वं प्रशास्तुरवगम्यते। कर्मणा यमभिप्रैति स संप्रदानं तदुच्यते
तेन दीयमानेन दंडेनाभिप्रेयमाणत्वान्मैत्रावरुणस्य तत्प्रधानं दानं। उपयुक्तस्य संस्काराद्युपयोक्तव्यस्य सक्रिया। गरी
यसी प्रशास्तुश्च दृष्टं तेन प्रयोजनं स्थिता हि प्रैषानुवचने कुर्वत आलंबनं भवन् दृष्टार्थ एव दंड इति मैत्रावरुणा
र्थे दंडदानं प्रयोजकं दंडस्य इत्याग्नीषोमीयविकारे निरूढपशावसत्यपि दीक्षिते मैत्रावरुणार्थेन दंडोपादा
नसिद्धिः॥ उत्पत्तावपि न सप्रयुक्तं तदर्थः श्रुतिहेतुत्वात्तस्यार्थोऽन्तरगमनशेषत्वात्प्रतिपत्तिः स्यात्॥ कृष्णविषाण
याकंडूयत इति विषाण्यस्मृपत्ते चात्वालके शविषाणं प्रास्यतीति तत्र संशयः॥ किं चात्वाले प्रासनमर्थकर्मउ
त प्रतिपत्तिरिति। तत्रानद्रव्यस्य कृतार्थस्य संस्कारेण प्रयोजनं। प्रतिपत्तिरतो नेयमिडाखिष्टकृदादि चात्वाले
प्रासनमिडाभक्षणं स्विष्टकृदित्येवमादि यत्किंचित्कृतकरद्रव्याश्रयकर्म तत्सर्वमर्थकर्म निर्दिष्टनिर्दिष्टे तेष्वर्थे संस्का
रेण प्रयोजनाभावात्॥ उच्यते। कृतार्थमपि पद्द्रव्यमाकीर्णकरमित्यतः प्रतिपत्तिमपेक्षते न तत्प्रधानमतो वरं। अ

मेक्षितमयाप्रतिपत्तिविधौ निश्चिते नहुलादेवतान्त्रोपेनिर्दृतमपि प्रयोजनं विषयत्वइति करुल्प्यते॥ सोमिके
चक्रतार्थत्वात्॥ वारुणेनैककपालेनावभृथमभ्यवयंतीति विधाययुन एतन्मापते। यत्किं सोमलिप्तंतेनावभृथं
यतीति। किमवभृथसाधनं सोमलिप्तमुतावभृथदेशे नयनमस्य प्रतिपत्तिरिति। तत्रावभृथशब्दे नस्कृत्याकर्मा
भिधीयेते॥ तत्साधनतया सोमलिप्तमुक्तं तृतीयया। देशे वभृथशब्दस्य प्रवृत्तौ लक्षणा भवेत्। सोमलिप्त
हविश्छेन चोदितेवभृथं प्रति। उच्यते। उत्पत्तिवाक्यविहितमयुक्तेडाशावेएधतः। हविश्छेनचोनुसंबद्धं सोमलिप्तं
न शक्नुयात्। यंतीत्यनेन सोमलिप्तावभृथयोः संबंधाविधौ सति अत्यंतंवाक्यं स्यात्। उद्दिश्य सोमलिप्तं तु यानम
त्रं विधीयते धात्वर्थोवभृथपदंनदेशं लक्षयिष्यति। अवभृथदेशंगच्छंतः सोमलिप्तान्यादाय गच्छेयुः। तानि तद्देशे
प्रक्षेप्तव्यानीत्यर्थः॥ कर्त्रदेशकावेषकं रोतीति साकांचसमन्यार्थमनुनिष्पन्नेन मूलेन नि एकाक्षीक्रियते
।कुएति श्वपूर्ववदानेवर्ततेयदिस्मार्थपरिवासनमनुनिष्पन्नेनतकयालोपधानसाधनतयाकगतोयवेष
लेनोपादते इति न च शाखापरिवासमूलन उपवेषं करोतीत्यन्वयः। येन सूलस्योपवेषार्थतालभ्येताव्यवहित

तकल्पनाप्रसंगात्। तस्मादरग्वार्थत्वात्सर्वस्य तदेव प्रयोजकं॥ हरणे तु जुहोतियोगस्य साम्यात् द्रव्या
णां चार्थशेषत्वात्॥ सूक्तवाकेन प्रस्तरं हरतीति। तत्र संशयः किं शाखाप्रहरणं शाखायाः प्रयोजकं वा क
मर्थकर्म उत प्रतिपत्तिरप्रयोजकमिति। तत्र प्रस्तरतुल्यत्वाच्छाखायायागस्य साधनं। निर्वापवच्चाहरणं
यागस्य साधनं। निर्वापवच्चाहरणं यागस्यैवोपलक्षणं। प्रस्तरप्रहरणं तावद्यागः सर्वार्थकर्मोत्तसाधनभू
तः प्रस्तरः। शाखायाश्च सहशब्दात्प्रस्तरेण समानागम्यते तेन सापि यागं प्रति गुणभूता। हरतिश्चाविवक्षितो नि
र्वापालंभादिवत् यागोपलक्षणार्थः तस्माच्छाखाप्रहरणं होमोऽर्थकर्म द्रव्यकर्मसंयोगन्यायादिति प्राप्ते
ऽभिधीयते। यागे यदि सहत्वं स्यात्तस्याद्देवं हरतौ तु न तत् तत्रैव प्रतिपाद्यत्वात्प्रस्तरस्य तथैव सा। सूक्तवाकेन
प्रहरतीत्यत्र मांत्रवर्णिकदेवताविधिवत् यागः कल्पितो न तु हरतियोगवचनः अत्र तु हरणमात्रश्रुतं सह
शाखया प्रस्तरं प्रहरतीति। न च प्रहरणे सूक्तवाकः साधनं येन मान्त्रवर्णिकतिधिवद्यागः स्यात्। तस्माद्ध
रतौ च प्रस्तरस्य प्रतिपाद्यत्वाच्छाखाया अपि प्रतिपत्तिः यथा हरतौ सहभावे प्रतिपत्तिनगुणत्वं शाखायास्तथायच्छे

शा०व०
८१
97

वक्ष्यते। अत्र तु दूरतावेव साहित्यं न याग इत्येतावास्थितं उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागः स्यात्। दर्शपूर्णमासयोरयः
प्रणयति निःप्रयोजना संयुक्ताः प्रणीताः उत्पाद्यन्ते श्रूयते प्रणीताभिर्हवींषि संयौतीति। तथा तद्वैरिप्रणीतानि निनयतीति तत्र सं
देहः। किं मासांसंयवनं निनयनं चोभयं प्रयोजकं उभयार्थाः प्रणीताः उत संयवनार्था एव तदेव प्रयोजकं। निनयनं प्रतिपत्तिरिति।
तत्रोत्पत्त्यावसंयोगात् कैमर्थ्यस्याभिलाषिणीः स्वीकुर्वतीति उभे तस्मादुभयार्था इति दृश्यते। हविः संयवनेनासां गुणभावस्तृतीयया
द्वितीयया निनयनं प्रतिपत्तिर्विधीयते। उत्पत्त्यावसंयुक्तानामपि प्रयोजनेन। प्रणीतानां कैमर्थ्यस्याभिलाषिणीनां तृतीयया
पं संयवनार्थलिंगं गम्यते। निनयं तु द्वितीयाश्रुत्याश्रुत्या तासामेव प्रतिपत्तमर्थमप्रयोजकं। प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृ
तार्थत्वात्। दीक्षितस्य दण्डधारणं विधाय पुनराम्नातं। क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति। किं मैत्रावरुणाय दण्डप्रदानं द
ण्डस्य प्रयोजकमर्थकर्मवत् प्रतिपत्तिकर्मा प्रयोजकमिति। तत्र द्वितीयाश्रुतिसंयोगात् कृतार्थत्वाच्च धारणे। मैत्रावरुणहस्ते
स्य प्रक्षेपः प्रतिपादनं। दीक्षितधारणे कृतार्थो दण्डः प्रतिपत्त्यपेक्षः। द्वितीयया चतस्मा धान्यं गम्यते तेन दानस्य। अतो मैत्राव
रुणहस्ते प्रक्षिप्यते। उच्यते। चतुर्थ्या संप्रदानत्वं प्रशास्तुरवगम्यते। कर्मणा यमभिप्रैति संप्रदानं तदुच्यते। तेन दीयमानेन

राम

दंडेनाभिप्रेषमाणत्वान्मैत्रावरुणस्य तत्प्रधानं। उपयुक्तस्य संस्कारादुपयोक्ष्यसंस्क्रिया। गरीयसी प्रशास्तुश्च दृष्टं तेन प्रयोजनं। स्थि
तत्वाद्धि प्रैषानुवचने कुर्वत आलंबनं भवन् दृष्टार्थ एव दंड इति मैत्रावरुणार्थं दंडदानं प्रयोजकं दंडस्य। दत्वाग्नीषोमीयविकारे निरूढ
पशाव सत्यपि दीक्षिते मैत्रावरुणार्थेन दंडोपादानसिद्धिः॥ उत्पन्नो येन संयुक्तं तदर्थं श्रुतिहेतुत्वात्तस्यार्थांतरगमने शेषत्वात्
प्रतिपत्तिः स्यात्॥ कृष्णविषाणया कंडूयत इति विधाय पश्चाच्चात्वाले कृष्णविषाणां प्रास्यतीति तत्र संशयः। किं चात्वाले प्रास
नमर्थकर्मोत प्रतिपत्तिरिति। तत्रेन द्रव्यस्य कृतार्थस्य संस्कारेण प्रयोजनं। प्रतिपत्तिरतो नेयमिज्यस्य शकृतादिवच्चात्वाले प्राश
नमिड्याभक्षणं स्विष्टकृदित्येवमादि यत्किंचित् कृतकरद्रव्याश्रयकर्म तत्सर्वमर्थकर्म निर्वृत्तेर्थे संस्कारेण प्रयोजनाभावात्। उच्यते
। कृतार्थमपि पद्रव्यमाकांक्षं करमिस्यतः। प्रतिपत्तिमपेक्षेत तद्विधानमतो वरं। अपेक्षिततया प्रतिपत्तिविधौ निश्चितेत दूला
देवतस्त्रो येनिर्हृतमपि प्रयोजनं विषयत इति कल्प्यते॥ सोमिके च कृतार्थत्वात्॥ वारुणेनैककपालेनावभृथमभ्यवयंतीति
विधाय पुनराम्नायते। यत्किंचित् सोमलिप्तं तेनावभृथं यंतीति। किमवभृथसाधनं सोमलिप्तमुतावभृथदेशे नयनमस्य प्रतिपत्ति

गव·
५८
98

रिति। तत्रावभृथशब्देन श्रुत्यात्कर्माभिधीयते। तत्साधनतया सोमलिप्तमुक्तं तन्नीयया। देशे वभृथशब्दस्य प्रवृत्तौ लक्षणा भवेत्। सो
मलिप्तं हविःशब्देन चोद्यते वभृथं प्रति। उच्यते। उत्पत्तिवाक्यविहितपुरोडाशावरोधतः। हविःशब्देन तु संबद्धं सोमलिप्तं न शक्नुयात्। संती
त्यनेन सोमलिप्तावभृथयोः संबंधविधौ सति असंतं वाक्यं स्यात्। उद्दिश्य सोमलिप्तं तु पानमात्रं विधीयते। भातत्वौ वभृथपदं तद्दे
शं लक्षयिष्यति। अवभृथदेशं गत्वा तु तः सोमलिप्तान्यादाय गच्छेयुः तानि तद्देशे प्रक्षेप्तव्यानीत्यर्थः॥ कर्तृदेशकालानामचोदनं प्र
योगे नित्यसमवायात्। दर्शपूर्णमासयोश्च तारकऋत्विजः। समे यजेत। पौर्णमास्यां पौर्णमास्या यजेत। व्रीहिभिर्यजेत सोमेन य
जेत इत्यादिषु तत्किंचित्कारकश्रवणं तत्सर्वमुद्दिश्य विचार्यते। किमनुवादमात्रं उत विधिरिति। तत्र सर्वं क्रियाविधेरेव कारकं
प्राप्यते यतः ततस्तन्न विधातव्यमप्राप्तस्यर्थगाचिविधिः। विषमादिनिवृत्त्यर्थं समादिश्रवणं यदि। परिसंख्या प्रसज्येत तनानोऽमा
स्ति विधेर्विधा। समादिस्वरूपं विषमादिनिवृत्तिर्वा विधीयेत। स्वरूपं तावन्न विधातव्यं प्राप्तत्वात्। विषमादिनिवृत्तिविधौ
परिसंख्या प्रसज्येत। सा च त्रिदोषा। न च प्रकारांतरं विधेरुपलभामहे येनैते परिसंख्यादोषमनासाद्यैव विधित्वं लभेरन्।

एम

तस्मादनुवादः। नैवं। नियमेन न हि प्राप्तिः समादीनां क्रियाविधेः। समे वा विषमे वापि सोमेनान्येन वा यजिः। प्राप्नोतीति तेन सोमादेः
प्राप्तिर्नस्यादपि क्वचित्। यस्मिन्पक्षे न सोमादेः प्राप्तिस्तत्र विधिर्भवेत्। नैषा मतो न वा रत्वं परिसंख्या च नासजेत्। अप्राप्तिपक्षसद्भा
वान्नियमार्थो विधिः स्थितः॥ तथाद्रव्ये गुणश्रुतिरुत्पत्तिसंयोगात्॥ श्वेतं पशुमालभेत भुक्तानां चरुमिश्रादीनां गुणानाममूर्ता
नां क्रियासाधनभावासंभवान्न तादर्थ्ये न नियमः संभवति द्रव्योपादानानुषंगे प्राप्तानामनुवादमात्रं गुणश्रवणं। भुक्तीनां च
रुमिश्रादीनां परो विशेषः भुक्तस्य चरुविशेषणत्वाच्छ्रुतो पि न क्रियासंबंधो गम्यत इति उत्तरं। असत्यपि साक्षात्क्रियान्वये
द्रव्यद्वारेण तदुपपत्तेः। भुक्तत्वविशिष्टचरोः क्रियार्थत्वात्तत्रापि नियमविधिः॥ संस्कारे च तत्प्रधानत्वात्। व्रीहीन — वहंतीति
नावघातस्य यागार्थतया श्रवणं देशादिवत्। न च चरुवद्विशिष्टं द्रव्यं क्रियासंबंधि श्रूयत इति तंडुला सिद्धक्रियानुवादमात्रमि
त्यधिकाशंका। उत्तरं यद्यपि न श्रवणमस्ति तथापि प्रकरणवशात्प्रधानसाधनं लक्षयित्वा तत्रावि नियुक्तस्यावघातादेः प्रधानां
गत्वमस्त्येवेति तत्प्रयुक्तिरथाहुर्नैव॥ यजति॥ चोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्॥ तदुक्ते श्रवणाज्जुहोतिरासेच

भा०त०
५५
७७

नाधिकः स्यात्॥ यागांगभूतानां देशादीनां नियमविधौ स्थिते तत्प्रसंगाद्यागादिलक्षणं क्रियते। देवतोद्देशेन द्रव्यपरित्यागो या-
गः स एव प्रक्षेपाधिको होमः। स्वीयस्य परकीयत्वापादनं दानमिति। आचार्यस्तु लोकसिद्धपदार्थव्यवहारिणां मीमांसायां तल्लक्षण-
मनुचितमिति यागाद्यनुष्ठानप्रकारकथनमिति व्याख्यातवान्। यो देवतामुद्दिश्य द्रव्यं त्यजति तेन यागचोदनार्थः संपादितो
भवति प्रक्षेपं त्वधिकं कुर्वता होमविध्यर्थ इति। एवं च चोदनाग्रहणमार्थवद्भवति न लक्षणपरत्वे प्रदेशांतरे विदं सूत्रं अन्यथा व्या-
ख्यातमाचार्येण। पूर्वं दर्शादियागानुवादेन देशादयो नियम्यंत इत्युक्तं तत्रेयमाशंका कथं दर्शादेर्यागत्वं न त्वुत्पत्तिचोदनासु आ-
ग्नेयादिषु यजिः श्रूयत इति। तत्रेदमुच्यते द्रव्यदेवताक्रियं श्रूयमाणं यजिचोदना इति मंतव्यं तद्विनाभावात् तस्यैतस्य कस्यार्थः।
इतरस्य तु यजिः स्येति कर्मणि पुनर्जुहोतिश्रवणं चतुरवत्तं जुहोतीति तत्कथमुपपादनीयं यागहोमयोर्भेदात् अत आह प्र-
सेचनाधिकः स्यात्। प्रक्षेपमात्रं तत्राधिकं चतुरवत्तसंस्कारार्थं विधीयते यागांशस्तु प्राप्तानुवाद इत्यक्षरांजस्यं सूत्रयोर्भवति॥
विधेः कर्मापवर्गित्वाद्दर्थांतरे विधिप्रदेशः स्यात्॥ परातिथ्यायां बर्हिस्तदुपसदामिति। किमिदमाछिपविधानमुत निरिष्टकोप

एम

देशः।अथवाधर्मातिदेशः।अथवाबर्हिःसाधारण्यविधिरितिद्विस्थस्यगोऽईपित्वापननआच्छिघरापत्नांईदिग्वचनसाद्श्याराच्छिघ
विधिरिष्यते।एवंचाच्छिघमानस्यबर्हिषःस्यादनर्थकः।आतिथ्यायांविधिस्तस्मान्निर्दिष्टकविधिर्वरं।शिष्टाचारविरोधात्तुनैतदप्यु
पपद्यते।तस्माद्धर्मातिदेशोयंआतिथ्यायांहियादृशंअश्ववालादिभिर्बर्हिस्तादृगेवोपसत्स्वपिबर्हिःशब्देनधर्माणांलक्षणैवंभ
वेदतः।साधारण्यविधिर्ज्यायांस्तत्रदोषोनकश्चन।आतिथ्यार्थमुपादेयंयद्बर्हिस्तन्नकेवलं।तदर्थत्वेनसंग्राह्यंतदेवोपसत्स्व
मपि।बर्हिर्धर्माश्चतद्वाराततस्तत्साद्गुणामियुः॥इतिश्रीशास्त्रदीपिकायांचतुर्थस्याध्यायस्यद्वितीयःपादः द्रव्यसंस्कारकर्मसुप
रार्थत्वात्फलश्रुतिरर्थवादःस्यात्।यस्यपर्णमयीजुहूर्भवतिनसपापश्लोकंशृणोतीत्यत्रसंशयः।किंपर्णमयीत्वंक्रत्वर्थमुत
पुरुषार्थमाहोस्विदुभयार्थमिति।तत्रफलश्रवणात्पुरुषार्थत्वं।यद्यपिचैवंजातीयकस्यफलविधित्वमौदुम्बराधिकरणेनिराकृतं
तथापिविहितस्यपर्णत्वस्यफलापेक्षायांक्रतुप्रयोगवचनात्सन्निहितमपापश्लोकश्रवणमेवरात्रिसत्रप्रतिष्ठावद्विपरिण
मेनफलंमाश्रयितुंयुक्तं।अथवासाधनांशमात्रमौदुम्बराधिकरणेविचारितं।विधिरहितस्यभवतीत्येतावन्मात्रस्यसाधनत्र

शा.चु.
१००
100

तिपादकत्वं न संभवतीति विध्युन्मीलनापेक्षार्थवादत्वं । ऊर्जमिष्यभूनामभो —ति न स पापश्लोकं शृणोतीत्यादेराश्रयितव्यं इहतु न दुपेक्षा
मुपेक्ष्य वाक्यसाध्यांशो विचार्यते । नन्वेवं जातीयकमपि फलप्रतिपादकं लोके दर्शनात् अतः पुरुषार्थमित्येकः पक्षः । क्रत्वर्थं जु
हूद्देशेन विधीयमानं भवतु क्रत्वर्थं फलसंयोगात्तदर्थमपि स्यात् दध्यादिवदित्यपरः । सिद्धांतस्तु युक्तं द्रभः संयोगपृथक्त्वादु
भयार्थत्वं । इहत्वेकं वाक्यं न द्रुभयपरत्वेमिधेत । नन्वतावद्रुभयार्थं न च शृणोतीति निवर्तमानापदेशात्साध्यत्वं प्रतिपत्तुं शक्यं ।
न च विपरिणामेन फलपरत्वं । यथास्थितस्वरूपहानिप्रसंगात् । पर्णतायाश्च जुहूपस्थितक्रत्वर्थत्वेन निराकांक्षत्वादयु
क्तं शब्दस्वरूपस्य बाधनं । न च पर्णत्वस्य फलं प्रति विधीयमानस्याश्रयः प्रकृतोस्ति । तन्नयथा केनैवाश्रयेदीयमानेयाक्य
भेदः । तस्माद्पापश्लोकश्रवणस्यार्थवादत्वात्क्रत्वर्थमेव पर्णमयीत्वं ॥ नैमित्तिके विकारत्वात्क्रतुप्रधानमन्यत्स्यात् ॥
अपः प्रणयतीत्यत्र श्रूयते । चमसेन प्रतिष्ठाकामस्य प्रणयेदिति तथा वार्हद्गिरं ब्राह्मणस्य ब्रह्मसामकुर्यादिति । तत्र सं
शयः । यदेतत्काम्यं चमसयं नैमित्तकं च वार्हद्गिरं तदेव नित्यार्थं उतान्यदुपादेयमिति । तत्र नित्ये विप्रयोगे प्रणयनब्रह्मसामादेः

राम

तुर्थ्यं तेन निर्दिश्यतां सामर्थ्येन कर्म विधीयते। कामोपबंधस्तु फलत्वसूचनार्थो न स्वयं तंत्रं। अपि च येषु युगपत्काम्यते तेषामनिवार्यै

व युगपदुत्पत्तिः स्यात्। एकैकस्यैव कामस्यानिरपेक्षस्य साधनं कर्मेदं चोद्यते तच्च सापेक्षत्वे विरुध्यते। यादृशं हि कारणं यादृशस्य

कार्यस्य निष्पादकं तदेकमेव युगपज्जनयति। यथा मृत्पिंडो युगपदेकमेव घटं जनयति नानेकं कामनावशाच्च विशेषः।। विधि

र्हि चेतनप्रवर्तनात्मकः समीहितस्यैव फलत्वमुपकल्पयति न पश्वादिरूपस्य। येषु यद्यपि युगपत्कामना तेषु यदि कर्मणो युगपत्समर्थ

त्वाद्युद्दिश्य यदि प्रयुज्यते तदा तदेव भवति नान्यत्। यथा स्येक फलानि कर्माणि फलस्य स्वर्गस्य यशो वा साधनत्वेन चोदितानि युग

पदेकमेव तथाविधं फलं जनयंति। नानेकं इतरथा सकृदेव यावदिष्टं फलं सिद्धमिति न काम्यमेकं कर्म पुनः प्रयुज्येत। दृश्यते च पु

नः प्रयोगः। तथेष्टापत्येकमेव युगपत्फलं न च साहित्येनैवात्र कामानां फलत्वं नैकैकस्येति वाच्यं। साहित्यस्याविवक्षितत्वादित्यु

क्तं। अतः पर्यायेण कामः। योगसिद्ध्यधिकरणस्योत्पत्त्यसंयोगित्वात्।। इदानीमैहिकामुष्मिकत्वं फलानां चिंत्यते। स्वर्गस्तावदामु

ष्मिक एव वृष्टिरभिचारो वैरवानर फलं च पुत्रगतं ब्रह्मवर्चसादि ऐहिकमेव। कामनावशात् पश्वादयश्च चिंत्यते। किमामुष्मिका

शा· च·

१०१

एवमुक्ता नियता इति। तत्र प्रतिग्रहादिकं दृष्टं पश्वादेः कारणांतरं देहारंभकत्वेनातः चित्रादेः फलहेतुता पश्वादिरूपस्य प्रतिग्रहाद्यु
पायांतरदर्शनाद् दृष्टानपेक्षत्वाद् देहस्य तु मातापितृसंयोगमात्रेणानुत्पत्तेः। कारणांतरापेक्षणाद् दृष्टिश्च फलोपभोगार्हशरीरा
रंभकत्वमेव चित्रादेः पश्वादिहेतुत्वमित्यामुष्मिकान्येव पश्वादीनीति प्राप्तेऽभिधीयते। साध्यत्वमेव पश्वादेः शब्देन प्रतिपाद्यते
अमुत्र वेह वेत्येवं नास्ति शास्त्रो नियामकः देहारंभमुखत्वं च फलानामप्रमाणकं। विपाकः कर्मणां येषां प्रा–देहविनिपाततः॥
प्राप्तास्तानीह भुज्यंते ततोऽन्यानि भवांतरे। इत्येवं पुरुषकारस्य पश्वादेः कारणं दृष्टं। तदुक्तं भाष्यकारेण तच्चैव हि कारणं शास्त्रे
ति तस्मादनियमः॥ समवाये चोदनासंयोगस्यार्थवत्वात्॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति। किमंगप्रयोजनसं
बंधोयं वाजपेयांगत्वेन बृहस्पतिसवस्य उत कालार्थः संयोगो वाजपेयोत्तरकालत्वं बृहस्पतिसवस्योपदिश्यत इति संशये
। उभयोर्वाजपेयस्य बृहस्पतिसवस्य च। प्रज्ञातफलयोर्नैवमिथोंगांगित्वसंभवः। न च कर्मान्तरं युक्तं लक्षणा हि तथा भवेत्।
क्त्वाप्रत्ययेन कालस्तु श्रुत्यैवोक्तो न लक्षणा। प्रसिद्धस्य तावद् बृहस्पतिसवस्य पुरोधस्यादिफलार्थत्वान्न वाजपेयांगत्वं।

राम

तं सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति न तावत्स्वर्गार्थं श्रुतफलार्थं वा। उत श्रुतफलार्थमेवेति संशयः। तत्र विधिः सामान्यरूपेण सर्वे
षां हि प्रवर्तकः। स्वर्गश्चाप्यर्थिनः सर्वैरिति तादर्थ्यनिश्चयः। कृतिः यथाभिलषितब्रह्मवर्चसाद्यर्थत्वे विधेरविशेषतः सर्वपुरुषान्प्र
ति प्रवर्तकत्वमवगतं बाध्येत। सर्वाभिलषितस्वर्गाद्यर्थत्वे तु तदनुग्रहः स्यादिति स्वर्गार्थता। ब्रह्मवर्चसादिश्रवणं त्वन्वाचयत्वेन तथा
त्वेयं। काष्ठाहरणदृवशात्त्वाहरणं सौर्येण स्वर्गं कुर्याद्ब्रह्मवर्चसमपि भवतीति। एवं च विधित एव स्वर्गार्थत्वेन परार्थत्वात् रात्रिसत्रे फल
श्रवणमर्थवादः पर्णमयीत्यादिरिति पूर्वाधिकरणमप्याक्षिप्तं अत्रोच्यते। अविशेषप्रतीतिर्यत्पदमात्रेण जायते। पदान्तरैकवा
क्यत्वाद्विशेषस्याप्यनेहसा। ब्रह्मवर्चसकामादिविषयोऽयमतो विधिः। स्याच्चेदन्वाचयस्तस्य भवेदन्योन्यसंश्रयः। स्वर्गार्थित्वे हि
निश्चिते स्यादन्वाचयः। तन्निश्चये च सति फलान्तरापेक्षायां स्वर्गकल्पना। तस्माद्ब्रह्मवर्चसाद्येव फलं॥ सर्वकाम्यमंगकामैः प्रक
रणात्॥ सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति। किमयमनुवादो विधिरिति संशये विधिभावनयोरश्रवणात्तदभावे च साध्य
साधनसंबंधायोगात् वाजपेययूपयोरिव गोदोहनादिगुणकामैः पश्वादिभिर्दर्शपूर्णमासयोः संबंधसद्भावात्तदपेक्षोऽय

श्रा०चं.
१०२
102

मनुवादोदर्शपूर्णमासस्तु स्वर्थ इति भाष्ये ब्रूमः। षष्ठी संबंधमात्रेऽपि वर्तमाना न दुष्यति। तादर्थ्ये च चतुर्थ्यर्थस्तत्र भाष्ये न केनचि
त्। स्याः प्रधानफलार्थत्वमंगानां तत्र नुग्रहात्। न त्वंगफलशेषत्वं प्रधानस्य कथंचन। सर्वकामार्थिता तस्मात् प्राप्ता सेह विधीय
ते। कर्तव्याविति चालार्ये विधिभवनयोः परं। उत्पत्तिचोदनाभ्यो वा प्राप्तिर्द्वे विधिभावने। आ। श्रित्य फलसंबंधमात्रमत्रोपदि
श्यते। यद्दर्शपूर्णमासौ कर्तव्यौ तत्सर्वकामार्थेनेति तस्मात्फलविधिः॥ तत्र सार्ववि शेषात्॥ किमेकस्मिन्नेव प्रयोगे सर्वैः का
मा भवंति उत प्रयोगभेदेनेति संशये। सर्वे युगपदेव स्युर्निमित्तस्याविशेषतः। यादृक् निमित्तमेकस्य तादृगेवापरस्य हि। कामना
वशाद्धि शेषोपदेशपदाकाम्यते। न देवनदानान्यादिति चेन्न। अनंगत्वात्। नहि कामना कर्मणः फलस्य वाऽङ्गं येन तदभावे फ
लानुत्पत्तिः स्यात् ननूपादेयभूतस्य कर्तुर्विशेषणभूता कामना कर्माङ्गमेव न कामिन उपादानमुद्दिश्यते हि कामिनं कर्मोपदि
श्यत इति षष्ठे वक्ष्यते। अत एव लिंगस्याविवक्षा। येऽपि कर्मण्यनुपादेयस्यापि कामिनो ऽपूर्वं प्रति गुणभूतत्वात्कामनायि नि
योगस्ति द्वावंगमिनी [illegible] तस्यापि लिंगविवक्षा दुर्वारैव। अत्रायमपरो विशेषः। यत्फलकामोऽभिनिष्पूयते फलान्येव च

राम

ते। कथं पुनर्व्यवेतस्यानुषंगाभ्युपगमः। नायमनुषंगः किंत्वध्याहारः। स च पत्रकृष्णैरपि व्याख्यावस्थितस्याविरुद्धः तेनाश्रुतफलानामप्य
ध्याहृतफलान्वयात्। सर्वेषां कर्मणामत्र फलवत्त्वमवस्थितं॥ तत्सर्वार्थमनादेशात्॥ स्थिते फलार्थत्वे किं सर्वफलार्थमुत एकार्थत्व
मिति विशेषानिर्देशात्सर्वार्थत्वे प्राप्ते ऽभिधीयते। येनैवैकेन तद्धाकं साकांक्षं परिपूर्यते। तेनैवैतन्निराकांक्षमिति नानेककल्पना॥
स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्। एकं फलमित्युक्तं किं तदेकमिति न ज्ञायते ऽतः पुनरपि सर्वार्थत्वमप्रामा एवं तानध्यवसाया
सामेति तदुच्यते स्वर्गो निरतिशयप्रीतिरूपो दुःखविवर्जितः। भूयांसो ऽभिलषंत्येनमस्येतत्सुखं नराः। सति संभवे शास्त्रस्य भू
यो विषयत्वं न्याय्यं। अविशेषप्रवृत्तस्यातिसंकोचपरिहारात्। स्वर्गश्च दुःखासंयुक्तनिरतिशयसुखात्मकः सर्वेषामभिलषि
तः पश्वादिसुखं दुःखानुषक्तं च केचिदेव प्रार्थयंते। प्रत्यवायपरिहारस्तु सर्वाभिलषितो ऽपि प्रत्यवायायेसयाक्षिपतापिवि
लंबेन तद्रूपमागच्छति। ततस्तु सुकरज्ञानं सुखमेव वरं फलं। न चानतिशयत्वेन स्वर्गात्मकमिति स्थितं॥ क्रतौ फलार्थवात्सं
गवत्कार्ष्णाजिनिः॥ प्रतितिष्ठंति ह वा य एता रात्रीरुपयंतीति श्रुतं। रात्रिशब्देन ज्योतिर्गौरायुरित्यादिकोत्यादिनानि सो

श्रा॰
१०३
103

त्यादित्वात्रि ह्यानि कर्माण्युच्यंते। न हि इदं रात्रिसत्रं स्वर्गार्थमुत प्रतिष्ठार्थमिति संशयः। तदर्थं च प्रतितिष्ठंतीति। किमयं फलविधि

रुतार्थवाद इति। अपापश्लोकवत्तत्र वर्तमानापदेशात्। फलविध्यसमर्थत्वात्तदुदेवार्थवादता। अनादिष्टफलत्वेन तस्मात्स्वर्गफ

लार्थता। निर्देशात्तु प्रतिष्ठैव फलत्वेनावगम्यते। जुहूवन्नैव कर्मैतन्निराकांक्षं फलं प्रति। कल्पनीयं फलं तत्र विनामोध्यात्त

ते वरं। स्वर्गस्याध्याहारे तस्य रूपं तस्य च श्रुते कर्मसंबंधः फलत्वं च कल्प्यं न प्रतिष्ठायास्तस्य रूपमेकं वा द्वयं च क्लृप्तं फलत्वमि

त्यर्थसनंततयापि परिणाममात्रं लघीयः। उपयंतीत्यपि वर्तमानापदेशो विधिरूपेण विपरिणम्यते। यच्छब्दश्च व्यवहिता

न्वयः। तदयमर्थः ये प्रतितिष्ठासंति ते रात्रीरुपेयुरिति। एवं हि धर्ममात्रकल्पनाल्लाघवं। इतरथा तु सर्वस्यैवार्थवादता

त्सकल एव विध्युद्देशोऽप्रतिपन्नफलविशिष्टः कल्पनीयः। स्वर्गकामा रात्रीरुपेयुरिति। कल्पितोऽप्यसौ प्रतिष्ठार्थवादे

न स्तुत्वेन संगच्छते। यस्मात्प्रतितिष्ठंति तस्मात्स्वर्गकामा उपेयुरिति किं केन संगच्छते। न तत्र च पदयोरध्याहारः स्यात्। तथाप्यर्थ

वादसंगत्यर्थं प्रतिष्ठैवाध्याहर्तव्येति प्रतिष्ठार्थता॥ काम्यकर्मणि नित्यः स्वर्गोऽपि यथा यत्रांगेऽकृतार्थः। यत्र स्वर्गादन्यत्फलं श्रु

एम

ल्कतोः। कल्पनीये हि फले प्रकृतक्रतुफलसिद्धिरेव तद्धि कृतसंस्कारद्वारेण पयोव्रतनियमस्य फलं पुरुषमाश्रयितुमिति
कल्प्यर्थतो॥ चोदनायां फलाश्रुतेः कर्ममात्रं प्रतीयेत न तस्य शब्दं प्रतीयते॥ विश्वजिता यजेतेत्यादिष्वश्रुतफलासु चोदना
सु फलमस्ति नेति संशयः। नास्त्येव फलमेतस्यां चोदनायां फलाश्रुतेः। एवं गम्यमदृष्टं हि फलं तेन विना कथं। प्रसेतुं शक्य
ते तच्चेदध्याहारेण कल्प्यते। परिपूर्णमिदं वाक्यं नाध्याहारमपेक्षते। ननु यागेन कुर्यादित्युक्ते किं कुर्यादित्यपेक्षणादध्याहा
रो वकल्प्यते। सत्यं यदि यागेन कुर्यादित्युच्येत यागं कुर्यादिति तूक्ते परिपूर्णत्वान्नाध्याहारापेक्षा फलश्रवणे हि सति विध्यानुगुण्या
त्समानपदोपात्तधात्वर्थातिक्रमेण वाक्यसमर्पितं फलं भाव्यत्वेन भावनावलंबते। तदभावे तु धात्वर्थभाव्यत्वं को निवारयेत्
। तथा च सति से पूर्णं वाक्यं नाध्याहारमिति क्षमं। नन्वेवं यागमात्रकर्तव्यतायामुच्यमानायां न कश्चित्प्रवर्तेत सत्यं को दोषः॥ विध्या
नर्थक्यं। नह्यपि भवतु। निष्फलस्य कर्तव्यत्ववचनमप्रमाणं स्यादिति। एतदप्यस्तु सेमो पंथा गच्छतु भवानित्याद्यनाप्तवाक्य
वत्। किं कुर्मः न च कर्तव्यताबलादेव फलमुपकल्पयितुं शक्यं। तदानीं दुःखदर्शनात्। प्रत्यक्षविरोधाच्च। आपत्स्याच्च फलं न रू

शा०२.
१०४
104

न मात्रविनष्टेन यागेन शक्यते कर्तुं। न चापूर्वेण संभवति तदभावात्। अतो हि फलेऽङ्गयागादिक्रिया धात्वर्थस्य तत्साधनत्वे शब्देन प्रतिपा-
दिते न दृष्टाद्दृष्टमप्यपूर्वं कल्प्यते। यागक्रियामात्रपर्यवसिते तु शब्दे कथमपूर्वसिद्धिः। तदभावे च कथं कालान्तरभावि फलं कस्य-
नं। न चेतरेतराश्रयं भवति। फलाधीनमपूर्वं तदधीनं फलमिति। असत्यपि भाव्यापेक्षणे कस्य यागः कर्तव्य इति नियोज्यापेक्षणे
फलकामस्याध्याहार इति चेन्न। अध्याहारमन्तरेणापि तल्लाभात्। यथा निषेधाधिकारेषु अप्रवृत्तस्य निवर्तनासंभवान्न अ-
र्थविच्छेदकतयोपयुक्तापि प्रवृत्तिरेव विशेषणमिति तद्धि शिष्टस्य नियोज्यत्वावगमान्न प्रयुक्तिलाघवमाश्रित्य फलकामोध्या-
ह्रियते। तथा प्रवृत्तेषु परेष्वपि अशक्तस्य अजीवतश्च तदसंभवान् शक्तो जीवंश्चाधिकारी लब्ध इति किमध्याहारेण। तस्मात्त
फलमेवेदं कर्मेति प्राप्त उच्यते। विधियुक्तान्क्रियानैव धात्वर्थं भाव्यमृच्छति। भाव्येन च विना वाक्यं नैव तत्परिपूर्यते। वाक्यसं-
पूरणायातः फलमध्याहरिष्यते अश्रुतस्यापि फलश्रवणे चेतनप्रवर्तनात्मकविध्यवरुद्धा भावना धात्वर्थं तावन्न कथंचि-
द्भाव्यमङ्गीकरोतीति तदतिरिक्तभाव्यापेक्षतया आध्यात्तं वैदिकमेव भवति। किमुत परा वैदिकमेवान्यत्रास्थितमध्या- य

राम

साधनापेक्षत्वादश्रुतसाधनांतरस्यकल्पनाद्दूरं।कामनिमित्तयोरपिश्रुतस्यमन्न्मयादेःसन्निहितस्यनित्यार्थेप्युपादानं।वारणा
भिवर्तोदिनित्यविधिमदृष्टापूर्वःपक्षः।भवंतिह्याहरणान्यप्यधिकरणानि।ऐन्द्रवायवेतुवचनात्प्रतिकर्मभक्षःस्यादित्याद
नि।नित्यविधिर्वनास्तीतिकृत्वाचिंत्यते।अथवाऽरणोयज्ञायज्ञीयइतिअभीवर्तोब्रह्मसामेतिचसामान्यविधिरूपं॥मन्न्मयंवाहि
द्विरंचविशेषतःप्रणयनेह्यादृशाहेचश्रुतस्तदेवनित्यार्थेपिसंनिधिविशेषायुक्तमितिमन्यते।ब्राह्मणेनमित्तेनवाहद्विरमि
तिश्रुतं।मन्न्मयेचप्रतिष्ठायांनित्येस्यातामतोनतेनत्सन्नयत्रश्रुतंसन्निहितमप्यन्येनसंबद्धुमर्हति।साधनाकांक्षानित्य
स्यार्थाक्षिप्तेनसामान्यविहितेनवानिवर्तते।नतुनैमित्तिकेन।संनिधिमात्रस्यसंबंधकारणत्वाभावात्।निमित्तश्रु
तिविरोधाच्च।सतिचासतिचनिमित्तेक्षिपमाणस्यकीदृशंनैमित्तिकत्वं।तस्मादन्यान्नित्यार्थौ॥एकस्यतूभयत्वेसंयोगपृ
थक्त्वं॥अग्निहोत्रंदध्नेंद्रियकामस्यजुहुयादितिश्रूयते।तत्रकिंकामार्थमेवदधिनित्येपिस्यात्।उततोन्यन्नित्यमिति
संशये।पूर्वाधिकरणन्यायात्काम्यत्वेनश्रुतंदधि।ननित्यार्थमुपादेयमतोन्यन्नित्यमिष्यतां।नन्वत्रदध्येवनित्या

थैश्रूयते दध्ना जुहोतीति। नैवमेतस्य शाकस्य कामवाक्ये कृताकृता। गम्यते नो नानित्यार्थेऽथ यद्दधिविधीयते। दध्नेंद्रियं कुर्या
दित्युक्ते किमाश्रितेनेत्यपेक्ष्यते। होमसंयुक्तस्य दध्नः फलापेक्षा। तयोरेवमाकांक्षावशादेकवाक्यता। यद्दध्नेंद्रियं कुर्यादिति हो
माश्रितेनाय चेद्दध्ना जुहोति तदिंद्रियार्थमिति। तस्मान्नित्यस्य दधिविधानाभावात्काम्यमेव तत्स्यात्। नैवं द्वयोरेकस्य वाक्यां
क्षा भवेद्यदि तत्तयोः प्रकल्प्येतैकवाक्यत्वं निराकांक्षं त्विहोभयं। कामवाक्यं तावद्दधिपरिगृनिलब्धहोमाश्रयं। नाश्रयसंबंध
कृतं भमाणमपेक्षते। दधिस्वरूपमपि लोकसिद्धं। नोक्थ्यवृताहिवदलौकिकं यतो न तदर्थमन्यापेक्षा। दध्नोऽपि फलवद्धो
मसंयुक्तस्य न फलांतरापेक्षा। तस्मात्स्थकत्तयोगादुभयार्थं दधि स्यात्॥ द्रव्याणां तु क्रियार्थानां संस्कारः अक्रतुधर्मः
स्यात्॥ ज्योतिष्टोमे पयोव्रतं ब्राह्मणस्य तदादिश्रूयते। तत्पुरुषार्थं क्रत्वर्थमिति संशये पुरुषसंयोगात्तस्य पुरुषश्री
त्यर्थतया लब्धफलस्य जंजप्यमानमंत्रवचनन्यायासंभवात्। यो नियमस्यापि तद्वत्संयुक्तस्य तत्फलनिराकांक्षत्वान्न
प्रकरणग्रहणमिति पुरुषार्थत्वं उच्यते। नियमत्वं तत्तरेणापि पुरुषश्रीतिदर्शनात्। नियमस्य फलं कल्प्यं तच्च प्रकरणा

तद्धर्मकं कर्मान्तरविधौ बृहस्पतिसवशब्दो धर्मलक्षणार्थः स्यात्। कालविधौ तु तस्य कालार्थत्वान्न कदाचिल्लक्षणा तस्मात्प्रसिद्धबृहस्पति
सवस्य वाजपेयपूर्वकत्वं विधीयत इति प्राप्ते ब्रूमः। वाजपेयपश्चात्त्वे एवं संस्कारत्वं तत्परार्थता। तस्मिन्क्रिया च बाध्येत न च दृष्टगतं भवति। का
लः शक्य उपादातुं काले कर्म हि चोद्यते। काले च चोद्यमानं तत्कर्माविपरिवर्तनात्। प्रसिद्धात्कर्मणो भिन्नमविज्ञातप्रयोजनं। वाज
पेयांगभावेन वाक्येनैव विधीयते। वाजपेयं प्रयोगं यथोक्तं निर्वर्त्य निवृत्ता वत्येव कृतीस्यात्। इदम परमद्धं तस्य पश्चात्कर्तव्यमिति। ए
वं च वाजपेये किंचिद्दृष्टानात छब्दानुग्रहोऽन्यथा तस्य त्वं न परार्थता स्यात्कालोपलक्षणार्थत्वात्। वाजपेयप्रकरणं च बाध्ये
त। स्थिते च कर्मान्तरत्वे धर्मलक्षणापि मा सा अग्निहोत्रवद्दोषः।। उभयार्थमिति चेत्।। संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति। किं
पौर्णमास्या वैमृधस्य चांगप्रयोजनसंबंधः। पौर्णमास्यंगं वैमृधः उत कालार्थः संयोगस्तस्मिन्काले क्रियमाणः प्रकरणादुभयो
र्दर्शपूर्णमासयोरंगमिति संशये। संस्थासंयोगात्संस्थितस्य पुनरंगासंभवात्। नांगप्रयोजनसंबंधः कालार्थस्तु संयोगः प्रकर
णाविशेषादुभयांगमिति प्राप्ते ब्रूमः।। पौर्णमास्या हि संयुक्तो वाक्येनानेन वैमृधः। तस्य प्रकरणं नेष्टं तच्चासंयुक्तगोचरं यत्तु संस्थिता

शा॰च॰
१०६
106

यागांगे संभवतीति तदुभयांगत्वेपि तुल्यं। नचामावास्यांगमेवेदमिति युक्तं प्रकरणाविशेषादिति त्वयैवोक्तं। अतो यद्दाग्नेयः पूर्णमा
सस्तिकंतंत्रं द्वयोः साधारणं विहितं तद्युक्तं पौर्णमासीसमाप्य पुनरिदमंगं कर्तव्यमिति वाक्यार्थः। तथा च वाक्यशेषः। वैमृधः पौ
र्णमासेनुनिर्वाप्यो भवतीति तेन पौर्णमासः सेन्द्रो भवतीति इन्द्राभावेन पौर्णमास्या वैगुण्यमिवाशंक्य तत्समाधानार्थतां दर्श
यति॥ अनुत्पत्तौ तु कालः स्यात्प्रयोजनेन नसंबंधात्॥ आग्निमारुतादूर्ध्वमनुयाजैश्चरंतीत्यत्राधिकालार्थत्वे संयोगस्यात्स्यात्तत्पा
रार्थ्यं स्यादिति अंगप्रयोजनसंबंधमन्वानस्योत्तरं। आग्निमारुतस्य सौमार्थत्वेनोपदिष्टस्यानुयाजानां च पश्वर्थतयातिदिष्टा
नां विपरिवर्तमानत्वान्न कर्मांतरत्वं। तेषां तु निर्ज्ञातप्रयोजनानामंगांगित्वापेक्षाभावात्कालार्थः संयोगः॥ उत्पत्तिकालः स्याद्वा
क्यस्य प्रधानत्वात्॥ ज्योतिष्टोमे श्रूयते। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति। तत्र दर्शपूर्णमासशब्दस्य तत्पारार्थ्ये प
रिहाराय अंगप्रयोजनसंबंध एवन्यायः। नैवं। दर्शोपलक्षिते काले सोमयागो विधीयते। स च प्रकृत एवातो न कर्मांतरसंभवः।
दर्शोतिरकालमनुपादेयं प्रत्युपादीयमानोपि सोमः संनिधौ त्वविभागादिति न्यायान्न कर्मा — २। प्रकृतश्चासौ फला

एम

र्थत्वान्न दर्शांगतां प्रतिपद्यते। अतो न तावत्सोमस्य दर्शांगत्वं नापि दर्शादेः सोमांगत्वं प्रविधीयमानत्वात्। न ह्यविधीयमा
नमंगं भवति न चान्न दर्शपूर्णमासौ विधीयेते। विधायकाभावात्। दर्शोत्तरकाले हि सोमस्य विधिर्न दर्शस्य। न चाकृतयोर्द
र्शपूर्णमासयोस्तदुत्तरकालतः सोमः श्रवणेन कर्तुमित्यर्थात्तयोरपि विधिः स्याद्विध्यंतरविहितयोस्तु तयोर्लाभान्नानुपपत्ति
स्तदुत्तरकाले तु सोमश्चोद्यते स च चोद्यमानोऽपि सन्निधेर्न कर्मांतरमित्युक्तं तस्मात्सोमस्यायं कालविधिः फलसंयोगस्त्व
चोदितेन स्याद्दोषभूतत्वात्। वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते इति विधायाम्नायते यस्मिञ्जात एतामिष्टिं निर्वप
ति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवतीति। तदिदं दृष्टत्वादिकं रात्रिसत्रप्रतिष्ठावत्फलमिति स्थितं॥ तत्किमि
ष्टिकर्तुः पितुः फलमुत पुत्रस्येति विचारे। न्यफले कर्मणि अन्यस्य प्रेरणासंभवात्पितुरेव प्रेर्यत्वाद्दाधानगतात्मनेपदा
द्विसाध्यकर्मफलानामाधातृगामित्वनियमात्पितुरेव फलं। नेतरेवं। येनैव वाक्यशेषेण फलमेतत्समकल्प्यते। ते
नैव पुत्रगामित्वप्रतिपत्तिरपि स्फुटा। यस्मिञ्जाते निर्वपति स पूतो भवतीति स्पष्टं पुत्रगामित्वं पुत्रफलमपि पितुरभिल

ग.च. १०७ (०)

षितमेवेतिविधेरात्मनेपदस्य चाविरोधः॥ एवं गार्हपत्यमेव वैश्वानरी या चिंत्यते किं जननानंतरमेव कर्त्तव्या उत वृत्ते जात
कर्मणीति निमित्तानंतरं नैमित्तिकमुपसंप्राप्तं विनाकारणेन नातिक्रमितव्यमतोऽनंतरमेव स्यात्तस्यामिष्टत्वात् किंतु कार
णं पुत्रफलार्थं हारं कमतस्य च वृत्ते जातकर्मणि स्तनप्राशनं न पुनः प्राक्। अवृत्ते जातकर्मणि इष्टिर्निरूप्यमाणा स्तनप्रा
शनमुत्कर्षेत् तत्र कुमारविपत्तिप्रसंगात् इष्टिरेवयमनर्थिका स्यात्। तस्मात् वृत्ते जातकर्मणि कर्त्तव्या। पुनश्चिंत्यते किं जा
तकर्मानंतरं कर्त्तव्या उताशौचापगमे स्वकाले वा गत इति। निमित्तानंतरं प्राप्ता प्रयोजनविरोधतः। उत्कृष्यतां वा तु पुन
नोत्कृष्यमर्हति। शौचांगेन विनाप्येषा कर्त्तव्येव निमित्ततः। अपि वाप्येकदेशे स्यादिति षष्ठे हि वक्ष्यते। उच्यते निमित्तस्य
रसात्स्यासिर्गीता वत्सा निवारिता। प्रयोजनविरोधेन तस्मादंगोपसंग्रहः। निमित्तानंतर्यं तावत्प्रयोजनविरोधादेव बा
धितमित्युत्कृष्टेष्टिः उत्कृष्टा चेदवैगुण्याय शौचकालप्रतीक्षया अशौचकालापगमे पौर्णमास्यादिकाले कर्त्तव्या॥ प्र
धानेनाभिसंयोगादंगानां मुख्यकालत्वं॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयांगत्वेन चोद्यमानो बृहस्प

एम

तिसवः किं प्रधानकाले शरदि तेन सह हि क्रमयोगः कर्तव्यः उत निर्देशप्राप्ते स्वकाले वसंत इति संशयः। न च। सांगस्य हि प्रधानस्य
विधानं देशकालयोः। अंगानां च बृहस्पतेरपि तदंगत्वात्तत्र हि क्रिया। न हि वाजपेयः शरदि कर्तव्य इत्थं चोद्यते किंतु वाजपेयप्रकरणको यः
फलार्थो व्यापारः प्रयोगः फलभावनाख्यः तस्यायं कालविधिः शरदि वाजपेयेनेति तृतीयानिर्देशात् तस्यैव फलसामग्रीभूतस्य
चिकीर्षितस्य कालापेक्षितत्वात् स च व्यापारोंगप्रधानव्यासक्त इति तुल्यः प्रधानस्यांगानां च तत्कालयोग इति वाचनिककाल
विरोधादिति दिक्। कालो बाध्येत न त्वयं कालो बृहस्पतिसवे वर्जितांगेषु चूतार्थ इति नातिदेशं बाधितुमुत्सहते तत्र ह्यतिदेशो
पि कालातिरिक्तांगेषु चूतार्थ इति न वचनसंकोचायालं तस्मात्प्रधानकालत्वमेवं प्राप्तेऽभिधीयते। न स वाचनिकः कालो
बाधेनैवातिदेशिकं। बृहस्पतिसवे त्वेष शरत्कालो न चोद्यते। यस्य कालविधिस्तस्मादुद्दिष्टेन सह श्रुतः। वाजपेयप्रकरणको यः स्वका
र्ये प्रतिव्यापारः शरदि विहितस्तमेवेहापि समभिव्याहृतेन क्त्वाप्रत्ययेन प्रतिनिर्दिश्यते ततः पश्चात्तनत्वेन बृहस्पतिसवश्चो
द्यमानस्तस्य योगबहिर्भावान्न कालं लभते यदि परं वाजपेये चूते कर्तव्यः सन्नतिक्रमकारणाभावादनंतरमेव क्रियेत अ

शा.च.
१०८
108

स्मिन्नतिक्रमकारणंकालोपसंहारःक्त्वाचसर्वकालतायांस्मर्यतेनानंतर्ये।तस्मात्स्वकालेप्रयोगः।निर्वृत्तमपिवाजपेयापूर्वमने
नांगेनवलवत्क्लिप्यते॥ ॥इतिशास्त्रदीपिकायांचतुर्थाध्यायस्यतृतीयःपादः॥ प्रकरणश्रुत्सामान्याच्चोदनानामनंगत्वं॥
अनुप्रसादानिविदेवनादीनिचयागायागकर्माणिप्रवृत्तसश्रूयतेराजसूयेनस्वाराज्यकामोयजेतेतितत्रसंशयः।किंसर्वाण्येव
फलवंतिसमप्रधानानिपुरुषार्थानिउतयागाःक्रत्वर्था इतितत्र।सर्वेषांप्रवृत्तत्वेनफलापेक्षितयातथा।राजसूयपदस्या
पिसमानत्वात्फलान्वयः।राजसूयप्रातिपदिकंयद्यप्यप्रसिद्धंतथापितृतीयांतत्वात्फलस्यसाधनाभिधायित्वेननिर्णीतं
प्रवृत्तानांफलापेक्षिणामविशेषात्सर्वेषांनामेत्यध्यवसीयते।एवंसाधनत्वेऽवगतेस्वाराज्येचफलेभावनामात्रंविधियुक्ता
दाख्यातात्प्रतीयाद्यप्रपेक्षितमितितन्मात्रपरमाख्यातंकेवलप्रत्ययप्रयोगासंभवात्तुयत्रक्वचनधातावुपादातव्येछ
त्रिन्यायेनयागायागसमुदायेयजिरनुवादभूतःप्रयुज्यते।ततःसर्वेषांफलाच्चयास्याधान्यं।उच्यते।धात्वर्थानांफलै
र्योगोननाम्नामितिहिस्थितं।यजिश्चयागमेवाहयजेस्तेनफलान्वयः।राजसूयपदंचापिपर्यायैकाधिकारण्यतः।यागा

राम

गमेव तेनात्रयागानां स्यात्प्रधानता। इतरस्तु फलवत्संनिधानात्तदंगं भवति॥ मध्यस्थं यस्य तन्मध्ये॥ स्थितमयागानामंगत्वे। त
त्रविदेवनादयोऽभिषेचनीयाख्यसोमयागविध्यनंतरं समाम्नातास्तदीयमाहेंद्रस्तोत्रकालेऽपवृक्ताः माहेंद्रस्तोत्रं प्रत्यभिषि
च्यत इति। अयं चविदेवनादीनामभिषेकांतानामपकर्ष इति तइमे अभिषेचनीयांगमुत राजसूयांगमिति संदेहे कथं भाव
गृहीत प्रावृत्तांगमध्यपातादवांतरप्रकरणेनाभिषेचनीयांगतामाशंक्यमानास्योत्तरं। तत्र प्रयोजनापेक्षा कर्मणां यत्र चोद
ना। विदेवनादिकानां तु नमध्ये प्रवृत्तो विधिः। अभिषेचनीयानंतरं विहिताः प्रयोजनापेक्षाः सन्निधिप्राप्ताभिषेचनीयांगत्वबा
धेन प्रकरणाद्राजसूयांगतां नीतानापकर्ष समये भूयः प्रयोजनमपेक्षते येनावांतरप्रकरणविषयतां प्रपद्येरन्‌ तस्माद्राज
सूयांगं॥ प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयं॥ राजसूय एव सौम्यं चरुं बभ्रुर्दक्षिणेति विधाय श्रूयते। पुरस्तादुपसदां सौ
म्येन प्रचरंतीति किमयं चरुरुपसदामंगमंग प्रयोजनसंबंधो यं उत यामांतरवत्‌ फलार्थः कालार्थो यं संयोग इति चिंत्यते।
तत्र प्रकरणापेक्षात्सामान्यवचनादयं। स्वाराज्ये विनियुज्येत साक्षादुपसदंगता। न हि सौम्येनेति स्वश्रेनत्तीयातेनष

शा.च.
१०५
109

ष्टीनिर्दिष्टोपरंगत्वेनविनियुज्यमानःसौम्यःप्रकरणापेक्षेणसामान्येनराजसूयवाक्येनफलसंबंधंलभतेपुरस्ताच्छब्दश्चांग
स्यतत्समीपेनुष्ठानाद्यथाकथंचिदनुवादः।अत्राभिधीयतेनेयंषष्ठीतादर्थ्यवाचिनी।रियग्योगलक्षणातेषापुरस्ताच्छद
योगतः।अंगांगिभावमात्रेहिपुरस्तादित्यनर्थकं।प्रसज्येतपरंतस्मात्कालस्तावाद्विधीयते।तथावसतिनांगत्वंविधातुंशक्
याद्विधिः।नत्यनुमतिविधयोऽनेकार्थ्याप्रतिक्षमाः।तस्मात्कालार्थएवसंयोगइतिफलार्थःसौम्यः।।फलवद्दोकहेतु
त्वादितरस्यप्रधानंस्यात्।।वैश्वदेवीसांग्रहणीनिर्वपेद्ग्रामकामइतिप्रकृत्यामनमस्यामनस्यदेवाइतितिस्रआज्याहुतीर्जु
होतीत्यामनहोमाविहिताःकिंग्रामकामपदानुषंगेणसांग्रहणीवत्फलार्थाःसमप्रधानाःउतसांग्रहण्यंगमितिसंशये
सांग्रहण्याःप्रावृतांगनिराकांक्षायाःपुनरंगापेक्षाभावात्आमनहोमानांचफलपदानुषंगेणप्रयोजनावाप्तेरनपेक्षत्वा
त्संभवतिचप्राधान्येंगत्वायोगात्फलार्थत्वेप्राप्तेनुषंगेसवूराम्नानस्यपुनरनुसंधानात्तथावसतिसवूराम्नातरूपस्याघा
तारत्वंतागतिकृतयातराश्रयणादिहचानपेक्षतयासांग्रहण्याःप्रकरणाभावेपिसन्निधेरेवतदंगत्वसंभवादामनहोमानां

राम

चप्रावृत्तांगमध्यविहितत्वेनप्रकरणसंस्पर्शस्यापिसंभवाद्गतिकत्वाभावादनुषंगानाश्रयणात्परिधिमंत्रयवाप्याश्रयणेतरसं
भवादंगत्वमेवन्याय्यं॥ दधिग्रहोनैमित्तिकः श्रुतिसंयोगात्॥ ज्योतिष्टोमेश्रूयतेयांवाआध्वर्युश्चयजमानश्चदेवतामंतरितस्तस्या
आवृश्च्येतेप्राजापत्यंदधिग्रहंगृह्णीयादितिसोयंदधिग्रहः किंनैमित्तिकः उतनित्योनैमित्तिकश्चाथनित्यएवेतिसंशयेदेवतांतरयेया
गोनिमित्तेयंविधीयते।तस्मान्नैमित्तिकःसत्यंनित्योपिज्येष्ठशब्दतः।नैमित्तिकइतिसत्यंनित्योपिस्यात्कुतः ज्येष्ठशब्दतः।नैमि
त्तिकइतिसत्यंनित्योपिस्यात्कुतः ज्येष्ठशब्दसंस्तवात्ज्येष्ठोवाएषग्रहाणामितिप्रशस्तत्ववचनोज्येष्ठशब्दः नित्यश्चप्रशस्तोन
चंचलः अथवाप्राथम्यनिमित्तंज्येष्ठ्यंनित्यश्चसन्नयंपाठक्रमात्ग्रहांतरेभ्यःप्रथमंगृह्यमाणोभवतिज्येष्ठः।नैमित्तिकस्तुपश्चाज्जा
तेनिमित्तेक्रियमाणोनयोर्निर्गतोज्येष्ठःस्यात्तस्मादुभयरूपःस्यात्।नत्वेवंनित्यएवसन्नतुनैमित्तिकःकस्मान्निमित्तत्वा
श्रुतत्वात्।नत्वंतरयोनिमित्तत्वेनश्रूयतेयदिदृशाद्यभावात्यच्छब्दस्यचाकर्तृसमानाधिकरणस्यतत्प्रतिपादकत्वाभावात्अ
र्थवादमात्रमेतदयश्चवर्णामितिनित्यएवस्यात्॥वैश्वानरश्चनित्यःस्यान्नित्यैःसमानसंख्यत्वात्॥अग्नौश्रूयतेयोवैसंवत्सर

श्रा॰ सू॰
११०
110

मुख्यमभूत्वाग्निंचिनुतेयथासामिगर्भोविपद्यतेतादृगेवतदार्तिमाच्छेदितिश्वानरंद्वादशकपालंपुरस्तान्निर्वपेदितितत्रापिपूर्ववि
दर्थवादमात्रंसंवत्सरारंभेणमितिनित्यतांमन्यतेयच्छ्वस्तुकर्तुंसमभिव्याहृतोनिमित्ततांसंवत्सराभरणस्यप्रतिपादयतीति
नैमित्तिकत्वेव्यवस्थिताषट्चितिःपूर्ववत्स्यात्॥योऽग्निंचित्वानप्रतितिष्ठतिपंचपूर्वाश्चितयोभवंत्यथषष्ठींचितिंचिनुतेप्रति
ष्ठित्याऽइतिकिमियंषष्ठीचितिर्नित्यानित्यएवाग्निःषट्चितिकःउतसपंचचितिकएवचइदंतुचयनांतरमेकचितिकमप्रतिष्ठा
यांनिमित्तेविधीयतइतितत्रपूरणप्रत्ययोनस्यात्षट्संख्यापूरणाद्धिना॥पंचभिःसहिताचैषापूरयेत्तांनकेवला।नहिके
वलाचितिःषष्ठीतिशक्यावक्तुंतस्मान्नित्यएवाग्निःषट्चितिकः।नैवं।यच्छ्रोत्प्रतिष्ठायाःस्यश्रमाहंनिमित्ततां।अभिधानंहि
योपेक्षंषट्संख्यापूरणंभवेत्।नित्याःपंचचितयःप्रागभिहिताःततःपरमियंनैमित्तिक्यभिधीयतइत्यभिधानापेक्षंषष्ठीत्व
मुपपन्नमितिनपच्छ्रोतावगतनिमित्तापह्नवःशक्यतेकर्तुमितिनैमित्तिकीयं॥पितृयज्ञःस्वकालत्वादनंगंस्यात्॥अमावास्या
यामपराह्णेपितृयज्ञेनचरंतीत्यनारभ्याधीतःपितृयज्ञःक्रत्वर्थःउतपुरुषार्थइतिसंशयेकर्मवचनेनामावास्याशब्देनसम

राम

भिव्याहारानदंगत्वं यद्यपि कालस्यापि कालस्यापि साधारणोयं शब्दस्तथापि फलकल्पनापरिहाराय कर्मवाचिनैवांगीक्रियतेन
स्मात्कृत्स्न एवायमाहिताग्नेः॥ अनाहिताग्निरप्यनाहिताग्निना कार्यं इति चिह्नितः तस्य कृत्स्नभावाद्भवतु पुरुषार्थः तथा च भग
वता मनुना न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन इति वदता दर्शांगत्वं प्रदर्शितं अनंगं हि तेन विना क्रियेत तस्माद्दर्शांगं। नैवं
प्यपराह्णसामानाधिकरण्यात्लिप्सया कालवाचित्वमध्यवसीयते नेन वायमतीव साधारणः काले हि निरपेक्षोयं कालसंबंधापे
क्षया तु कर्मणि वर्तते तस्मात्कर्मसमभिव्याहाराभावादनंगं। मनुवचनस्य त्वयमर्थः श्राद्धाहेन मासि मासि श्राद्धमुच्यते दर्शश्रा
द्धेनापि अमावास्याकालः तदयमर्थः अमावास्यायामेवाहिताग्निः श्राद्धं कुर्यान्नितेन विना। सर्वे चैवापरपक्षाहः सु क्रियमाणो
पितृन्प्रीणातीति स्मृत्यंतरवशादन्येष्वप्यहःसु कुर्यादिति एवं च स्मृत्यंतरमनाहिताग्निविषयं भविष्यतीति तत्सिद्धं पितृयज्ञस्यानं
गत्वं॥ पश्वंगरशनास्यात्तदागमे विधानात्॥ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति येयं

सवनीयस्यांगभूताद्द्वितीयाद्रशनाम्नाः किं पशुबंधनार्थमुत यूपसंस्कारार्थमिति संशये यूपार्थासि स्याद्रशार्था द्रशार्थापि पशुबंधिनी।अ
नयक्रमणात्तेन पश्वंगं रशना भवेत्। नहि यूपस्य रशना किंचिदुपकरोति पशोस्तु नयक्रमणं कुर्वती भवति द्रशार्था तेनत्रिवृत्त्वा
नि परिकाभिहिता रशना वाक्येषु पशुयागांगतया विधीयते त्रिवृद्घृतमाग्नेयमुपाकरोतीति साच द्रशैनेव पश्वं नयक्रमणेनत
दंगतां प्रतिपद्यते ये यं त्रिवृच्छं छेदं तृतीयाया याच यूपं परिव्ययतीति द्वितीयायास्तत्सर्वं मान्तानुवादः यूपेहि पशुबंधश्चोदकप्राप्तः
पश्वरशनया यूपे पशुं बध्नाति सोवक्षं यूपे रशनां व्यापारयति यश्चाव्यापारयति स शक्यते तथा यूपं परिव्ययतीति व
कुमतो यमनुवादरतिपश्वर्था रशना चोदकप्राप्ता चान्या रशना ताभ्यामुभाभ्यां पशुर्वध्यते ततः पश्वर्था रशना तदर्थं च
परिव्याणं यूपेतस्याः प्रतिमोचनं प्रतिमुक्ता हि साभनयक्रमणाय कल्प्यते यूपो हि स्थाणुस्थानीयः तदर्थत्वेति स
र्वमेव रशार्थं भवति तस्मात्पश्वर्थे सेवं प्राप्ते ब्रूमः। यद्य रशार्थता यूपेस्यादेवं किंतु शकल्यना यूपार्थासत्यपि त्वेषा
रशार्था स्यादुर्थजन्मना। परिव्याणं हि यूपार्थं द्वितीयातोवगम्यते। रशना च परिव्याणशेषभूतात्तत्तायया। सर्वं तद्धि

परीतंस्यात्पश्वर्थारशनापरि। यूपार्थारशनातस्माद्वेन्नपशुबंधना। केचित्तुयूर्वपाशेपिनपशुबंधनार्थारशनाकिंतुयू
पस्यैवपरिव्याणंपश्वपाकरणस्यारादुपकारकमितिपूर्वः पक्षः। सिद्धांतस्तुयूपसंस्कारार्थमित्येवमाहुस्तथासत्यनुष्ठाना
विशेषान्निष्प्रयोजनाचिंतास्यात्पशुर्णेगत्वेकयूपेसवृत्त्युतमेवपरिव्याणमगृत्यमाणविशेषत्वात्तंत्रेणसर्वेषामुपकु
र्यादितिमतिपशुरशनाकार्यमितिप्रयोजनंनसिध्येदित्यास्तांतावत्॥ स्वरुश्चाप्येकदेशत्वात्॥ यूपस्यस्वरुंकरोतिस्वरुणा
पशुमनक्तीतिकिंयूपार्थः स्वरुः तस्यपश्वंजनंप्रतिपत्तिः उतपश्वर्थस्तस्ययूपादुपादानमितिसंशयेयूपस्येतिषष्ठ्यादे
वहतस्यगौरितिवतादर्थ्यमिन्यते। स्वरुणापशुमित्येवंशेषत्वोपिविभक्तितः। स्वरोः पश्वंजनांगत्वंपश्वोश्चापिप्रधानता। यू
पस्येसचपश्वव्यतिरेकजनिताषष्ठीननादर्थ्यंगमयतीतिपश्वर्थः स्वरुः॥ दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषात्॥
दर्शपूर्णमासयोः किंसर्वेषांयागानांप्राधान्यंउताग्नेयादीनामेवकालयोगिनामितरेषांतदंगत्वमितिचिंत्यतेयएवं
विद्वान्निव्येवंसंयुक्तावनुवादकोनविधायकाविस्यनुवादस्यतुप्रयोजनमाग्नेयादीनामेवप्राधान्यमित्येतावत्स्य

स्०।०च०
११२

तद्द्वितीयेऽधुनानुतदेवप्रयोजनं सिध्यतीति नेति चिंत्यते। तत्राख्यातानुसारित्वात्तत्त्वं तत्र यागाराजसूयवत्। तस्याविशेषतो वृत्तेः
सर्वयागप्रधानता। नामधेयं तावदाख्यातानुसारि यत्राख्यातं तत्र वर्तते न तु यत्र नाम तत्राख्यातं। आख्यातं चाविशे
षात्सर्वानेव रूपवतः प्रवृत्तान्यागाननुपादाय फले विनियुक्ते। अतो नामाप्युत्पन्नं द्विवचनात् प्रति रूपकं सर्वत्र वर्तेत
इति सत्याम्प्यनुवादेन समुदायद्वयसिद्धौ सर्वेषां प्राधान्यमुच्यते यदि नामाप्रसिद्धार्थं तदाख्यातवशं भवेत्। इद
न्तु पुनः प्रसिद्धार्थमाख्यातस्य विशेषणं। प्रातिपदिकं तावत्कालद्वयसंयोगाद्दाग्नेयादिषु प्रसिद्धार्थं द्विवचनमपि
च एवं विद्वानित्येवं संयुक्तानुवादद्वयपरिकल्पितसमुदायद्वयाभिप्रायं प्रसिद्धार्थमेव न च दर्शशब्दस्याप्रसिद्धार्थ
त्वमन्वारंभणीयावाक्यशेषे। मावास्यापर्यायित्वेन प्रसिद्धत्वात्तदेव प्रसिद्धार्थविशेषवाचि नामधेयं शब्दो त्वाख्या
तं सामान्यवचनं स्वविषये। वस्थापयितुमिति षण्णामेव प्राधान्यमितरेषां तु प्रकरणात्तदंगत्वं॥ ज्योतिष्टोमेन तुल्या
न्यविशिष्टं हि कारणं॥ दीक्षणीयाग्नीषोमीयादीनिष्टिपशुयागान् सोमयागं च प्रवृत्य श्रूयते ज्योतिष्टोमेन स्वर्ग

रम

112

कामो यजेतेति तत्र चिंत्यते किं सर्वयागानां फलसंबंधेन प्राधान्यं उत सोमयागस्यैवेतरेषां तदंगत्वमिति। तत्राख्याताविशे
षेण सर्वयागप्रधानता। नामधेयं प्रसिद्धार्थमाख्यातं विशिनष्टि हि। ज्योतिराख्यानहि स्तोमाः प्रसिद्धाः कस्यचिद्यज्ञे:। य
त्राववयवशो ऽ स्तीति नामधेयस्यागम्यते त्रिवृदादिषु तच्छब्दः स्तुतिमात्रतयोदितः। ननु स्तोमाभिधायित्वं ज्योतिःशब्दस्य तावता
। अस्तु वा त्रिवृदादीनां ज्योतिःशब्दाभिधेयता। तथापि सर्वयागानां तत्संबंधात्प्रधानता। स्तोमादि सर्वयागानामंगं स्तुर
विशेषतः॥ सर्वेषां फलवत्त्वेन प्रक्रिया न विशिष्यते। अतः प्रकरणात्स्तोमाः सर्वयागांगतामियुः॥ सोमयागेन संयुक्ताः स्तो
मा वाक्येन चेन्न तत्। ग्रहणस्तोत्रयोर्वाक्यैकालाभसंगतिर्यतः। द्वयोरपि भूतार्थत्वात्स्तोत्रस्य ग्रहणस्य च। स्तोत्राणि ताव
द्गृह्येस्तुवतेत्यादिवाक्योक्तानि भूतार्थानि ग्रहणं ऐंद्रवायवादिवाक्यविहितं सोमसंस्कारतया भूतार्थमेव अतो ऽ न्य
कालार्थ एव संयोगः ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति नत्वंगांगिभावोंऽगत्वं तु प्रकरणाविशेषात्सर्व
यागानां प्रसवगम्यते स्तोत्रीयासंख्यावस्तोमशब्देनोच्यते इति तत्संबंधः सर्वेषामविशिष्टः। तेनाख्याताविशेषेण

श्या.च.
११३
113

नामधेयाप्यविशिष्टतः। प्राधान्यं सर्वयागानामिति प्रासेभिधीयते। ज्योतिष्टोमाभिधानस्य यागस्यात्र फलं श्रुतं। ज्योतिष्टोम
पदं चेदं वाक्यशेषेण निरूप्यते। ज्योतिष्टोमपदविवेचनार्थं स्थितं हि वचनं त्रिवृत्पंचदशः सप्तदश एकविंश एतानि वाव तानि ज्यो
तींषि य एतस्य स्तोमा इति तदिह यदि त्रिवृदादिकस्य स्तोत्रीयासंख्याचतुष्टयस्य ज्योतिःशब्दो वाचकः अथापि न वा
चकः सर्वथा तावत्तत्संबंधिनि यागे ज्योतिष्टोमपदं नामतया वर्त्तते इत्येतावद्दृष्टमवगतं अतस्तत्संबंधिन एव
यागस्य फलमिदं नान्यस्य न च दीक्षणीयादीनां फलवाक्यप्रवृत्तिवेलायां स्तोमसंबंधः सिद्धो यागानां स्तोत्रीयाणां च नि
ष्पन्नत्वाद्विशेषेणांगांगिभावानिष्पत्तेः फलसंबंधोत्तरकालभाविप्राकरणिकस्तोमसंबंधाभिप्रायं च्छेदनादिविधा
विव यूपपदं ज्योतिष्टोमपदमित्याश्रयणीयं स्यात्तत्र प्रसिद्धनिर्देशसरूपः शब्दो बाध्येत सोमयागस्यापि यद्यप्यने
नैव न्यायेनांगांगिभावसंबंधः स्तोत्रैरसिद्ध एव तथापि सोमग्रहणस्य स्तोत्रोपाकरणस्य च कालार्थोपि तावत्संयोगः प्र
सिद्धः ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति तावता च सोमयागस्य स्तोमानां च संबंधमात्रं सिद्धं। तस्मात्तनि

राम

मितश्चबहुश्चाहिरितिशक्यतेज्योतिष्टोमपदेनसोमयागोभिधातुमितितद्विशेषितोयजिःतस्यैवफलसंबंधंकरोति॥प्रसिद्धरू
पेसतिसोमयोगेनरीक्षणायादिषुवर्त्ततेनत। ततःसएवेहफलान्वयेनप्रधानमन्येतुतदंगभूताः॥ ॥इतिश्रीमहोपा
ध्यायश्रीपार्थसारथिमिश्रकृतौशास्त्रदीपिकायांचतुर्थस्याध्यायस्यचतुर्थःपादः॥ ॥संवत् १८ ७५॥ ॥ ॥

राम

२२४

